वयसि प्रथमे सौख्यं प्रवुर्वाच्यं नवं नवम् ॥ १ ॥
पञ्चमान्नवमं यावत्तत्र संस्थैः शुभग्रहैः ।
तारुण्ये वयसि प्राप्ते सर्वसौख्यं प्रवर्तते ॥ २ ॥
नवमाद्व्ययभं यावत्स्थितैः सर्वशुभग्रहैः ।
वृद्धत्वेऽपि हि सम्प्राप्ते सर्वसौख्यं प्रवर्तते ॥ ३ ॥
लग्नादातुरीयगाः शुभा आद्ये वयसि सुखम् ।
पञ्चमादष्टमपर्यन्तं शुभा मध्ये वयसि सुखम् ।
धर्मादारिःफगाः शुभा अन्त्ये वयसि सुखम् ॥ ४ ॥
मीनाद्यं मिथुनान्तकं प्रथमकं प्रोक्तं वयः प्राक्तनैः
कर्काद्यं वणिजान्तकं तरुणतासंज्ञं च मध्यं बुधैः ।
कुम्भान्तं स्थविराह्वयंच बहुभि र्यत्तत्फलैः संयुतं
तत्सौख्यार्थविशेषकं वलयुते नैतद्वि शेषाच्छुभम् ॥ ५ ॥
यस्मिन्वयसि तुङ्गाश्च मुदिताः स्वगृहे स्थिताः ।
तत्र राज्यं सुखं लक्ष्मी स्तेजो भवति निश्चितम् ॥ ६ ॥
यस्मिन्वयसि मन्दाश्चे त्क्रूरदृष्टा विरश्मिकाः ।
तत्र हानिं रुजं विद्यात्पदभ्रंशं खलागम ॥ ७ ॥

(अर्थ)

यदि जन्मपत्री में लग्न से पाचवें स्थान पर्यन्त शुभ ग्रह हों तो बाल्यावस्था में सुख होता है ॥ १ ॥

पञ्चम स्थान से नवम स्थान पर्यन्त शुभग्रह हों तो युवावस्था में सुख मिलता है ॥ २ ॥

नवें स्थान से व्ययस्थान पर्यन्त शुभग्रह हों तो वृद्धावस्था में सुख मिलता है ॥ ३ ॥

लग्न से चौथे स्थान पर्यन्त शुभ ग्रह होने से बचपने में सुख मिलता है, पाचवें से आठवें स्थान पर्यन्त शुभग्रह होने से युवावस्था में सुख मिलता है, धर्म्म स्थान से व्यय स्थान पर्यन्त शुभ ग्रह होने से बुढ़ापे में सुख मिलता है ॥ ४ ॥

कोई आचार्य्य कहते हैं कि मीन से मिथुन पर्यन्त बाल्यावस्था होती है। कर्क से तुला पर्यन्त तरुण अवस्था होती है। वृश्चिक से कुम्भ पर्यन्त वृद्धावस्था होती है। यदि इन अवस्थाओं में शुभग्रह हों तो सुख मिलता है। पाप ग्रह हों तो दुःख मिलता है ॥५॥

जिस अवस्था में उच्च, मुदित अथवा स्वगृही ग्रह हों उस अवस्था में राज्य, सुख, लक्ष्मी और तेज बढ़ते हैं ॥ ६ ॥

जिस अवस्था में ग्रह बलहीन हों, क्रूर ग्रहों से दृष्ट हों, रश्मिरहित हों, उस अवस्था में हानि, रोग, पदभ्रंश (अर्थात् रोजगार से छूट जाना) और खल आदमी से झगडा होता है ॥ ७ ॥

लज्जिताद्यवस्थाफलानि

कर्मस्थाने स्थितो यस्य लज्जितस्तृपितस्तथा ।
क्षुधितः क्षोभितो वापि सनरो दुःखभाजनः ॥ १ ॥
सुतस्थाने भवेद्यस्य लज्जितो ग्रह एवच ।
सुतनाशो भवेत्तस्य एकस्तिष्ठति सर्वदा ॥ २ ॥
क्षोभितस्तृषितश्चैव सप्तमे यस्यवा भवेत् ।
म्रियते तस्य नारी च सत्यमाहुर्द्विजोत्तम ॥ ३ ॥
नवालयारामसुखं नृपत्वं कलापटुत्वं विदधाति पुंसाम् ।
सदार्थलाभं व्यवहारवृद्धिं फलं विशेषादिह गर्वितस्य ॥४॥
भवति मुदितयोगे वासशाला विशाला
विमलवसनभूषा भूमियोषासु सौख्यम् ।

स्वजनजनविलासो भूमिपागारवासो
रिपुनिबहविनाशो बुद्धिविद्याप्रकाशः ॥ ५ ॥
सक्षोभितस्यापि फलं विशेषाद् दरिद्रजातं कुमतिं च कष्टम् ।
करोति वित्तक्षयमंघ्रिबाधां धनाप्तिबाधामवनीशकोपात् ॥६॥
क्षुधितखगवशाद्वै शोकमोहादितापः
परिजनपरितापा दाधिभीत्या कृशत्वम् ।
कलिरपि रिपुलोकै रर्थबाधा नराणा
मखिलबलनिरोधो बुद्धिरोधो विषादात् ॥ ७ ॥
तृषितखगभवे स्या दङ्गनासङ्गमध्ये
भवति मदविकारो दुष्टकार्याधिकार. ।
निज जन परिवादा दर्थहानिः कृशत्वं
खलकृतपरितापो मानहानिः सदैव ॥ ८ ॥

(अर्थ)

(लज्जित आदि अवस्थाओं की परिभाषा पहले अध्याय में दी गई है। यहा पर उनका विशेष फल लिखा जाता है)

जिस मनुष्य के कर्म्म स्थान में लज्जित, तृषित क्षुधित अथवा क्षोभित ग्रह हों वह मनुष्य सदा दु.खी रहता है ॥ १ ॥

जिस मनुष्य के पञ्चम स्थान में लज्जित ग्रह हो उसका सुतनाश होता है ॥ २ ॥

जिस मनुष्य के सप्तम स्थान में क्षोभित अथवा तृषित ग्रह हों उसकी स्त्री मर जाती है ॥ ३ ॥

गर्वित ग्रह के फल यह हैं —नया घर, बगीचा, सुख, राज्य, कलाओं मे चतुरता, धर्म्म, लाभ, व्यवहार की वृद्धि ॥ ४ ॥

मुदित ग्रह होने से रहने को बडा भारी घर मिलता है, निर्मल वस्तु और आभूषण मिलते हैं, भूमि और स्त्री से सुख मिलता है, अपने इष्ट

मित्रों से प्रीति होती है, राजा से मैत्री होती है, शत्रुओं का नाश होता है, बुद्धि और विद्या का प्रकाश होता है ॥ ५ ॥

क्षोभित ग्रह होने से दारिद्र्य, दुर्बुद्धि, कष्ट, धननाश, पैर की बीमारी और राजा के कोप से धन का नाश होता है ॥ ६ ॥

क्षुधित ग्रह होने से शोक, मोह, ताप, आपसी आदमी से दुःख, आधिभीति, कृशता, शत्रुओं से झगड़ा, धन न होने का दुःख, बलकी हानि और बुद्धिनाश होते हैं ॥ ७ ॥

तृषित ग्रह होने से व्यभिचार, दुष्ट कार्य्य का अधिकार, निज जन अथवा अपने परिवार के द्वारा द्रव्यनाश, शरीर में कृशता, खलजन के द्वारा चित्त में सन्ताप और मानहानि होते हैं ॥ ८ ॥

(६) भावविशेषविचारप्रकरणम्

तनुभावविचार

विलोकिते सर्वग्रहैर्विलग्ने लीलाविलासैः सहितो बलीयान् ।
कुले नृपालो विपुलायुरेव भयेन मुक्तोऽरिकुलस्य हन्ता ॥१॥
सौम्यास्त्रयो लग्नगता यदि स्युः कुर्वन्ति जातं नृपतिं विनीतम् ।
पापास्त्रयो दुःखदरिद्रशोकैर्युतं नितान्तं बहुभक्षकञ्च ॥२॥
सोमो वा सोमपुत्रो वा राहुकेतुशनैश्चराः ।
यस्य लग्ने स्थितास्तस्य दोलिता प्रकृतिर्भवेत् ॥३॥
कविर्गुरुर्भानुसोमौ स्थिरप्रकृतिदायकाः ॥
सौम्यो लग्नपतिर्लग्ने लग्नं वा यदि वीक्ष्यते ।
गतक्लेशश्चिरायुश्च सुखी लोकस्तदा भवेत् ॥४॥
यस्मिन्भावे भावनाथेन युक्तो लग्नस्वामी तस्य भावस्य वृद्धिम् ।
कुर्यान्नित्यं मृत्युनाथेन युक्तो यस्मिन्भावे तस्य हानिं सदैव ॥५॥
सौम्ये लग्नपतौ वापि सौम्यैर्वा लग्नगैस्तथा ।
चिरायुर्जायते मर्त्यो वीतक्लेशः सुखी तदा ॥६॥

क्रूरे लग्नपतौ नष्टे क्रूरा लग्नगता ग्रहाः।
अल्पायुषं प्रकुर्वन्ति नात्र कार्या विचारणा ॥७॥
तनुपतिः सबलोऽष्टषडन्त्यगस्तनुसुखंन षडन्त्यमृतीट्स्वभे।
तनुसुखं न यदा विबलेऽङ्गपे वपुषि पापखगेच रुजाधिकः ॥८॥
तनुपतिः स्वगृहे बुध जीव भार्गवयुतश्च चतुष्टयेऽथवा।
भवति तुङ्गगृहे यदि सौम्यभे हितदशा सुखराज्ययशोऽर्थदः ॥९॥
लग्नपोवा लग्नगोवा यादृशोहि भवेद्ग्रहः।
सवर्णस्तत्समाचारो मानवो भविता भुवि ॥१०॥
यथा लग्नगते भौमे सवृद्धोऽपि युवाथवा।
तथा लग्न गते सौम्ये (बु.) युवा वालायते किल ॥११॥
शशिशुक्रौ यदा लग्ने नातिवृद्धो न वै युवा ॥
स्थविरौ राहुमार्तण्डौ तथा जीवशनैश्चरौ ॥१२॥
स्थविरौ सबलौ यस्य ग्रहौ स्यातां विलग्नगौ।
प्रकृत्या सभवेद्वृद्धो मान्यः सर्वजनेषु च ॥१३॥
राशिस्वभाव तुल्या ज्ञेया प्रकृतिः ॥
आरोहवीर्ये तु विलग्ननाथे भाग्याधिपे तादृशवीर्ययुक्ते।
विख्यातकीर्तिप्रभवो नरस्तु शुभग्रहेणापि समन्विते स्यात् ॥१४॥
(यथा मेषे दशांशपर्यन्तंसूर्यःपरमोच्चः। तुलायांदशांशपर्यन्तंनीचः।
नीचादुच्चपर्यन्तमारोही। उच्चान्नीचपर्यन्तमवरोही।
आरोही ग्रहः शुभः। अवरोही ग्रहोऽशुभः) ॥१५॥

(अर्थ)

जब सब ग्रह बलवान् हो कर लग्न को देखें तो मनुष्य अपने कुल में श्रेष्ठ, दीर्घायु, भयरहित और शत्रुनाशी होता है ॥ १ ॥

जब लग्न में २ शुभग्रह हों तो मनुष्य राजा होता है और उसमें नम्रता होती है, परन्तु जब लग्न में २ पाप ग्रह हों तो मनुष्य दुःखी, दरिद्री, शोकयुक्त और बहुत खाने वाला होता है ॥ २ ॥

जिस मनुष्य के जन्म लग्न में चन्द्रमा या बुध या राहु, केतु, शनैश्चर हों तो वह मनुष्य दोलायमान प्रकृति वाला होता है ॥ ३ ॥

जिसके लग्न में शुक्र, बृहस्पति, सूर्य और मङ्गल हों वह स्थिर स्वभाव वाला होता है। जिस मनुष्य के लग्न में सौम्य ग्रह हों या लग्न को सौम्य ग्रह देखें तो वह मनुष्य क्लेश रहित, चिरायु और सुखी होता है ॥ ४ ॥

लग्नेश जिस भाव में भाव के स्वामी के साथ बैठा हो उस भाव की वृद्धि करता है, परन्तु जिस भाव में वह अष्टमेश से युक्त हो उस भाव की सदा हानि करता है ॥ ५ ॥

जब लग्न का पति सौम्य ग्रह हो या लग्न में सौम्य ग्रह बैठे हों तो मनुष्य चिरायु, क्लेशरहित और सुखी होता है ॥ ६ ॥

जब लग्नेश क्रूर ग्रह हो अथवा नष्टबल हो या लग्न में क्रूर ग्रह हों तो मनुष्य अल्पायु होता है। इसमें विचार करने की कोई आवश्यकता नहीं है ॥ ७ ॥

जब लग्नेश बलवान् हो और ६,८,१२, स्थानों में हो, अथवा ६,८,१२ स्थानों के स्वामी अपने घर में हो, अथवा लग्नेश बलहीन हो तो शरीर का सुख नहीं मिलता है। यदि लग्न में पाप ग्रह हों तो मनुष्य अधिक रोगी होता है ॥ ८ ॥

जब लग्नेश अपने घर में हो अथवा बुध, बृहस्पति और शुक्र से युक्त हो अथवा केन्द्र में हो अथवा सौम्यग्रह के घर में हो या उच्च का हो या मित्र ग्रह की दृष्टि से युक्त हो तो सुख, राज्य, यश और धन मिलते हैं ॥ ९ ॥

लग्नेश अथवा लग्न में स्थित ग्रह अच्छा या बुरा जैसा हो वर्ण के रङ्ग के समान और वैसे ही गुण वाला मनुष्य होता है ॥ १० ॥

जब लग्न में मङ्गल हो तो मनुष्य वृद्ध होने पर भी जवान दिख-लाई देता है। ऐसे ही लग्न में बुध के होने से जवान आदमी भी बालक के समान काम करता है ॥ ११ ॥

जब लग्न में चन्द्रमा और शुक्र हों तो मनुष्य न तो अति वृद्ध स्वभाव वाला और न तरुण अवस्था का स्वभाव वाला होता है। राहु, सूर्य्य, बृह-पति और शनैश्चर वृद्ध ग्रह हैं ॥ १२ ॥

जिसके लग्न में वृद्ध ग्रह बलवान् हो कर बैठें वह मनुष्य स्वभाव ही से वृद्ध और सब लोगों में मान्य होता है ॥ १३ ॥

जैसी ही राशि लग्न में हो वैसी हा मनुष्य की प्रकृति भी होती है ॥

जब लग्नेश आरोहवीर्य्य वाला हो और भाग्येश भी आरोहवीर्य्य वाला हो और दोनों शुभ ग्रह से युक्त हो तो मनुष्य प्रख्यात तथा बलवान् होता है ॥ १४ ॥

(आरोह वीर्य्य का अर्थ यह है —जैसे मेष राशि में १० अंश पर्यन्त सूर्य्य परम उच्च होता है और तुला राशि में १० अंश पर्य्यन्त परम नीच होता है। नीच से उच्च पर्य्यन्त ७ घरों में जब ग्रह जावे तो वह आरोही कहलाता है। इसके विपरीत उच्च से नीच पर्य्यन्त अवरोही कहलाता है। आरोही ग्रह अथवा उसकी दशा शुभ फल दायक है, अवरोही ग्रह अथवा उसकी दशा अशुभ है) ॥ १५ ॥

धनभावविचारः

लग्नपो धनभावस्थो जनयेत्कुलदीपकम् ॥
धनाधिपो गुरुर्यस्य धनराशिस्थितो यदि ।
भौमेन सहितो वापि धनवान्सनरो भवेत् ॥१॥

चन्द्रेण मङ्गलो युक्तो जन्मकाले यदा भवेत् ।
तत्र जातस्य जायेत कुवेराद्धिकं धनम् ॥२॥

धनेशे लाभराशिस्थे लाभेशेच धनं गते ।
तावुभौ केन्द्रराशिस्थौ धनवान्सनरो भवेत् ॥३॥
धनेशे केन्द्रराशिस्थे लाभेशे तन् त्रिकोणगे ।
गुरुशुक्रयुते दृष्टे धनलाभ मुदीरयेत् ॥४॥
वित्तेशे रिपुभावस्थे लाभेशेऽस्तगते यदि ।
वित्तलाभौ पापयुतौ दृष्टौ निर्धन एवसः ॥५॥
लग्नेशे वै रिप्फगते रिप्फेशे लग्नमागते ।
मारकेशयुत दृष्टे जात· स्यान्निर्धनोनरः ॥६॥
धनभावगताः सौम्याः कुर्वन्त्येव धनं बहु ।
बुधदृष्टो गुरुस्तत्र निर्धनं कुरुते नरम् ॥७॥
गुरुश्चन्द्रेक्षितस्तत्र सर्वस्वं हन्ति निश्चितम् ।
क्रूरखेटादियोगैश्च दारिद्र्यं संभवेन्नृणाम् ॥८॥

(अर्थ)

जिसका लग्नेश धन स्थान में हो वह मनुष्य कुलदीपक होता है ॥

जिसके धन स्थान का स्वामी बृहस्पति हो और वह धन राशि में स्थित हो या मङ्गल से युक्त हो तो वह मनुष्य धनवान् होता है ॥१॥

जिसके जन्मसमय में चन्द्रमा मङ्गल से युक्त हो उसके पास कुबेर से भी अधिक धन होता है ॥२॥

धनेश लाभ स्थान में हो और लाभेश धन स्थान में हो और वे दोनों केन्द्र राशि में (?) स्थित हों तो मनुष्य धनवान् होता है ॥३॥

धनेश केन्द्र राशि में स्थित हो, लाभेश उससे त्रिकोण में स्थित हो, बृहस्पति अथवा शुक्र से युक्त या दृष्ट हो तो धन का लाभ होता है ॥४॥

धनेश शत्रु भाव में हो, लाभेश अस्तगत हो, धन स्थान और लाभ स्थान पापग्रह से युक्त या दृष्ट हो तो मनुष्य निर्धन होता है ॥५॥

लग्नेश बारहवें स्थान में हो, द्वादशेश लग्न में हो, मारकेश से युक्त अथवा दृष्ट हो तो मनुष्य निर्धन होता है ॥६॥

धन भाव में सौम्य ग्रह हों तो बहुत धन होता है। यदि उस स्थान में बृहस्पति हो और बुध से दृष्ट हो तो मनुष्य निर्धन होता है ॥७॥

यदि धन स्थान में बुध हो और चन्द्रमा उसको देखे तो सर्वस्व हरण करता है। ऐसे ही क्रूरग्रह आदि के योग से दारिद्र्य होता है ॥८॥

भ्रातृ भावः

स्त्रीग्रहो भ्रातृभावेशः स्त्रीग्रहो भ्रातृगोऽपिवा ।
भगिनी स्यात्तदा भ्राता पुंग्रहे पुंग्रहो यदि ।
मिश्रे मिश्रफलं चात्र बलाबलविनिर्णयः ॥१॥
सहजाङ्कसमान सोदरमालम् ॥
अग्रे जातान्विहन्त्या त्पृष्ठेजातांश्छनैश्चरः ।
अग्रजान्पृष्ठजान्भ्रातॄन्हतो राहुकुजौ सदा ॥२॥
लग्नात्तृतीयभवने राहुयुक्तो यदा शशी ।
भ्रातृहीनो भवेद्बालो लक्ष्मीवानपि जायते ॥३॥
शन्यारसंयुते लग्ने तृतीयैकादशे द्विज ।
कनिष्ठज्येष्ठयोर्नाशं भिन्नस्थे भिन्नभावहन् ॥४॥

(अर्थ)

जब भ्रातृ भाव का स्वामी स्त्री ग्रह हो या भ्रातृ भाव में स्त्री ग्रह हो तो बहिन होती है, परन्तु यदि पुरुष ग्रह हो तो भाई होता है और पुरुष ग्रह स्त्री ग्रह दोनों के मेल से भाई बहिन दोनों होते हैं, बल और अबल से निर्णय करना चाहिये ॥ १ ॥

भ्रातृ भाव में जो राशि हो उसकी संख्या के समान सहोदरों की की संख्या होती है। यदि भ्रातृस्थान मे सूर्य्य हो तो बड़े भाइयो का

नाश होता है, शनैश्चर हो तो छोटे भाइयो का नाश होता है, राहु और मङ्गल हो तो छोटे और बड़े दोनों का नाश होता है ॥२॥

जब लग्न से तीसरे स्थान में राहु युक्त चन्द्रमा हो तो बालक भ्रातृ हीन होता है परन्तु लक्ष्मीवान् भी होता है ॥३॥

जब लग्न, तृतीय अथवा एकादश स्थान में शनि और मङ्गल एक साथ बैठे हों तो ज्येष्ठ कनिष्ठ दोनों भाइयों का नाश होता है। यदि और किसी भाव में ये दोनों स्थित हों तो उस भाव का नाश होता है ॥४॥

सन्तानभावविचारः

झपालिवृपसिंहानां पञ्चमगा यदि सूतिसमये स्युः ।
ग्रह सहितेऽल्पसुतत्वं ग्रहरहिते पुत्रशोकार्तः ॥१॥
पञ्चमे स्थिरगेहे स्या द्रविः प्रथमपुत्रहा ।
पञ्चमे रजनीनाथ· कन्यापुत्र मपुत्रकम् ॥२॥
रिपुदृष्टो रिपुक्षेत्रे नीचो वा पापसंयुतः ।
भूमिजः पुत्रशोकार्तिं करोति नियतं नृणाम् ॥३॥
पञ्चमस्थश्चन्द्रपुत्रः सन्तानं प्रकरोति हि ।
अस्तं गतः शत्रुदृष्ट श्चोत्पन्नस्य विनाशक ॥४॥
समृद्धो वहुपुत्रश्च सुतस्थे देवतागुरौ ॥
सुत सुख विविधोपचितं परम धनं पण्डितं शुक्रः ॥५॥
सुतभवनगतोऽरिमन्दिरस्थः सकलसुतान्विनिहन्ति मन्दगामी।
समुदितकिरणःस्वतुङ्गभस्थःकथमपिजनयेत्सुतीक्ष्णमेकम् ॥६॥
तनयं दीनमलिनं सुतर्क्षे रचयेत्तमः ।
यदि चन्द्रगृहं तत्स्या चद्रानौ सन्ततिर्भवेत् ॥
पुत्रे केतुः प्रजाहानि र्विद्याविज्ञानवर्जितः ॥७॥
सुते राशितुल्या भवेत्सन्ततिर्वा ।
सुते दृष्टिसंख्यं सुतानां च संख्या ।
(पुंग्रहे पुत्रः । स्त्रीग्रहे कन्या) ॥८॥

यदैकादशे क्रूरखेटो नराणां परं पञ्चमे चन्द्रशुक्रौ भवेताम् ।
तदा तस्य कन्या भवेत्पूर्वगर्भे ।
तथा पञ्चमस्वामिना दृष्टयुक्तं भवेत्सन्ततिश्चान्यथानाशमाहुः ॥६॥
वृश्चिक झष कर्कटा येषामपत्यभावमापन्नाः ।
बहुलापत्या ज्ञेयाः कन्यापूर्वप्रजाश्चापि ॥१०॥
पापैर्बलिभिर्युक्ते पापर्क्षे पञ्चमे यदा राशौ ।
जातः पुरुषोऽपुत्रः सौम्यग्रहदर्शनातीते ॥११॥
अस्तं गते पञ्चमेशे पापाक्रान्तेच दुर्बले ।
नापत्यं जायते दैवा ज्जातोऽपि म्रियते शिशुः ॥१२॥
सुतारिरिःफगः पापः सन्तानाधिपतिर्यदि ।
पुत्राभावो भवेत्तस्य यदि जीवो न पश्यति ॥१३॥
भौमेन राहुणा वापि युक्तः स्यात्पञ्चमेश्वरः ।
राहुभौमान्तरस्थोवा पुत्रनाशकरो भवेत् ॥१४॥
जीवे मकरं याते पञ्चमभ आत्मजमृतिं विद्यात् ।
मीन स्थितेऽपि चैवं नवमे शुभसंस्थितेऽल्पजीवीच ॥१५॥
जीवस्थितस्य राशेः पञ्चमभे पापसंयुक्ते ।
पुत्रविनाशं विद्यात्सौम्यक्षेत्रं तु शुभदं स्यात् ॥१६॥
पुत्रभावे कुजक्षेत्रे जातं जातं विनाशयेत् ॥१७॥
पञ्चमैकादशे राहुः पञ्चमैकादशे शनिः ।
पञ्चमैकादशे भौमः सन्तानप्रतिबन्धकाः ॥१८॥
भौमः सूर्योऽथवा राहुः शनिर्वा यस्य पञ्चमे ।
द्वितीया पुत्रिणी तस्य प्रथमा स्यादपुत्रिणी ॥१६॥
क्षीणेन्दौ लग्नगते पापैर्व्ययनैधनलग्नस्थैः ।
क्षीणे विधौ सुतस्थे पुत्रहानो नरो भवति ॥२०॥
पापद्वयेन युक्ते पञ्चमभवने पुत्रशोकभाग्भवति ।
सौम्ये स्वक्षेत्रगते पञ्चमभे बहुप्रजालाभः ॥२१॥

सुतभे सितचन्द्राभ्यां युक्ते दृष्टेऽथवा तयोः ।
अल्पापत्यो भवेज्जातः कन्यानां जनको भवेत् ॥२२॥
पञ्चमे भवने शुक्रे जीवे वा मृगलाञ्छने ।
अल्पापत्यो भवेज्जातः कन्यानां जनको भवेत् ॥२३॥
भौमः पञ्चमभवने जातं जातं विनाशयति पुत्रम् ।
सौम्यग्रहैर्यदि दृष्टः कृच्छ्रादपरे वयसि पुत्री ॥२४॥
भूनन्दनो नन्दनभावसंस्थो जातं च जातं तनयं निहन्यात् ।
दृष्टो यदा चित्रशिखण्डिजेन तदा विनष्टः प्रथमः सुतः स्यात् ॥२५॥
सुताभिधाने भवने यदि स्यात् खलस्य राशिः खलखेटयुक्तः ।
सौम्यग्रहालोकनवर्जितश्च सन्तानहीनो मनुजस्तदानीम् ॥२६॥
सन्तानभावे गगनेचराणां यावन्मितानामिह दृष्टिरस्ति ।
स्यात्संततिस्तत्प्रमिता न संशे नराश्च कन्याः प्रमदाभिधाने ॥२७॥
षडादित्रयसंस्थे तु सुताधीशेत्वपुत्रता ।
केन्द्रत्रिकोणसंस्थे तु पुत्रलाभाभिसम्भव ॥२८॥
सत्पुत्र लाभः सुतपे सुरेड्ये
शुभेषु गेहेषु गते च भानौ ।
एकः स्थिरः स्यात्सुत एक एव
स्मिनः शुभ केन्द्रनवात्मजस्थे ॥२९॥
षष्ठे नीचे सुताधीशे काकवन्ध्या विशेषतः ।
काकवन्ध्या भवेन्नारी सुते केतुबुधौ यदि ॥३०॥
तत्र सौरिबुधौ स्यातां काकवन्ध्यात्व माप्नुयात् ॥
पापाक्रान्ते सुतस्थाने सुतं कष्टादिनिर्दिशेत् ॥३१॥
पञ्चमाधिपतिर्यस्य नेक्षते पञ्चमं गृहम् ।
तदा पुत्रस्य चिन्ता स्यात् ॥३२॥

सुतभवने भृगुजीवसौम्यनाथे
वलसहितैरवलोकितैर्युतैर्वा ।
वहुसुतजननं वदन्ति सन्त. ॥३३॥
पापद्वयेन युक्ते पञ्चमभवने नहि प्रजालाभः ॥३४॥

ऋतुस्तु भौमो विज्ञेयो रेतः शुक्र· प्रकीर्तितः ।
ऋतुं रेतोन पश्येन रेतसं न ऋतुस्तथा ।
अप्रसूतो जातकःस्यात् कान्तावर्गयुतोऽपिसन् ॥३५॥

ऋतुश्च कथितो भौमो रेतः शुक्रः प्रकीर्तितः ।
यद्वर्षे पश्यतश्चोभौ तद्वर्षे गर्भसम्भवः ॥३६॥

सुत लग्नेश दारेश लग्नेशानां यदा तदा ।
सङ्गमस्तु तदा पुत्र लाभः स्याद्यवनोदितम् ॥३७॥

(अर्थ)

यदि जन्म समय में मीन, वृश्चिक, वृष, सिंह राशियों में से कोई राशि पञ्चम स्थान में हो, तथा पञ्चम स्थान ग्रह सहित हो तो पुत्र कम होते हैं, ग्रह रहित हो तो मनुष्य पुत्र शोक से पीडित होता है ॥१॥

यदि पञ्चम भाव में स्थिर राशि हो और उसमें सूर्य बैठा हो तो ज्येष्ठ पुत्र का नाश होता है। पञ्चम स्थान में चन्द्रमा हो तो कन्या उत्पन्न होती है, पुत्र नही होते हैं ॥२॥

जव पञ्चम स्थान में मङ्गल वैठा हो और उसको शत्रु ग्रह देखें या वह शत्रु के क्षेत्र में हो या नीच का हो या पाप ग्रह से युक्त हो तो पुत्र शोक करता है ॥३॥

पञ्चम स्थान में बुध होने से सन्तान होती है, परन्तु यदि वह अस्त-ङ्गत अथवा शत्रु दृष्ट हो तो उत्पन्न सन्तान का भी नाश करता है ॥४॥

जव पञ्चम स्थान में वृहस्पति हो तो मनुष्य समृद्ध और वहुपुत्र

होता है। जब पञ्चम स्थान में शुक्र हो तो पुत्र का सुख, बहुत धन, और पाण्डित्य होते हैं ॥५॥

पञ्चम स्थान में शनैश्चर शत्रुगृही हो तो सब पुत्रों का नाश करता है, परन्तु यदि शनैश्चर अपने उच्च का हो और उदयी हो तो बहुत कष्ट से एक पुत्र होता है ॥६॥

पञ्चम स्थान में राहु हो तो पुत्र बड़ा दुःखी और मलिन होता है। यदि कर्क का राहु हो तो सन्तति होती है। पञ्चम स्थान में केतु होने से सन्तान की हानि होती है और मनुष्य विद्या तथा ज्ञान से रहित होता है ॥७॥

पञ्चम स्थान में जो राशि हो उसी की संख्या के समान सन्तान की भी संख्या होती है। अथवा पञ्चम स्थान में जितने ग्रहों की दृष्टि हो उसी के अनुसार सन्तान की संख्या होती है। पुरुष ग्रहों की दृष्टि होने से पुत्र होते हैं। स्त्री ग्रहों की दृष्टि होने से कन्याएं होती हैं ॥८॥

जब एकादश स्थान में पाप ग्रह हों और पञ्चम स्थान में चन्द्रमा और शुक्र हों तो पहिले गर्भ में कन्या का जन्म होता है। यदि पञ्चम स्थान अपने स्वामी से दृष्ट अथवा युक्त हो तो सन्तान होती है अन्यथा सन्तान का नाश होता है ॥९॥

जिस मनुष्यके सन्तान भाव में वृश्चिक, मीन और कर्क राशियां हों उसकी बहुत सन्तति होती है और पहिले गर्भ में उसके कन्याजन्म होता है ॥१०॥

जब पञ्चम स्थान में बहुत से बलवान् पाप ग्रह हों और पञ्चम स्थान पापग्रह का घर हो, सौम्य ग्रह उसको न देखे तो मनुष्य पुत्रहीन होता है ॥११॥

जब पञ्चमेश अस्तङ्गत हो अथवा पापग्रह से दबाया हो, या बलहीन हो तो सन्तान नहीं होती है. यदि दैव से हो भी जाय तो बालक मर जाता है ॥१२॥

यदि सन्तान भाव का स्वामी ५, ६, १२ स्थानों में हों और वह पाप ग्रह हो और उस पर बृहस्पति की दृष्टि न हो तो पुत्र का अभाव होता है ॥१३॥

यदि पञ्चमेश मङ्गल अथवा राहु से युक्त हो अथवा राहु और मङ्गल के मध्य में स्थित हो तो पुत्र का नाश करता है ॥१४॥

जब मकर का बृहस्पति पञ्चम स्थान में हो तो सन्तान की मृत्यु होती है। ऐसा ही फल मीनस्थ बृहस्पति का है। नवम स्थान में अशुभ ग्रह होने से पुत्र अल्पजीवी होता है ॥१५॥

जिस राशि में बृहस्पति हो उससे पाचवें घर मे यदि पाप ग्रह बैठा हो तो पुत्र का नाश करता है, परन्तु यदि वह स्थान सौम्य ग्रह का क्षेत्र हो तो शुभ फल होता है ॥१६॥

जब पञ्चम स्थान मङ्गल का क्षेत्र हो तो बालक उत्पन्न होकर नाश होते हैं ॥१७॥

पञ्चम और एकादश स्थान मे राहु, शनि अथवा मङ्गल हो तो सन्तान होने में विलम्ब होता है ॥१८॥

जिसके पञ्चम स्थान में मङ्गल, सूर्य्य, राहु अथवा शनि हो उसकी प्रथम स्त्री पुत्रहीन होती है, द्वितीय विवाह करने से पुत्र उत्पन्न होता है ॥१९॥

जब क्षीण चन्द्रमा लग्न में हो तथा पापग्रह व्यय, अष्टम और लग्न में स्थित हो, अथवा क्षीण चन्द्रमा पञ्चम स्थान में हो तो मनुष्य पुत्रहीन होता है ॥२०॥

जब पञ्चम स्थान में दो पाप ग्रह हों तो मनुष्य को पुत्र का शोक होता हैं, परन्तु जब पञ्चम स्थान में सौम्य ग्रह स्वक्षेत्री हो तो बहुत सन्तान की प्राप्ति होती है ॥२१॥

जब पञ्चम स्थान शुक्र और चन्द्रमा से युक्त अथवा दृष्ट हो तो मनुष्य कम सन्तान वाला होता है और वह कन्याओं का पिता होता हैं ॥२२॥

जब पञ्चम स्थान में शुक्र, बृहस्पति अथवा चन्द्रमा हो तो मनुष्य अल्प सन्तान वाला होता है और वह कन्याओं का पिता होता है ॥२३॥

यदि पञ्चम स्थान में मङ्गल हो तो उत्पन्न हुए पुत्र का नाश होता है, परन्तु यदि सौम्य ग्रहों की उस पर दृष्टि हो तो मनुष्य बुढ़ापे में कठिनता से पुत्र वाला होता है ॥२४॥

जब मङ्गल सन्तान भाव में स्थित हो तो उत्पन्न हुए पुत्र का नाश करता है, परन्तु जब उस पर बृहस्पति की दृष्टि हो तो पहिले लड़के का नाश होता है ॥२५॥

जब पञ्चम स्थान में खल ग्रह की राशि हो अथवा वह स्थान खल ग्रह से युक्त हो और सौम्य ग्रह उसको न देखें तो मनुष्य सन्तान हीन होता है ॥२६॥

सन्तान भाव में जितने ग्रहों की दृष्टि हो उसी प्रमाण की सन्तति होती है। पुरुष ग्रहों की दृष्टि होने से पुत्र होते हैं, स्त्री ग्रहों की दृष्टि होने से कन्याएं होती हैं ॥ २७ ॥

जब पञ्चमेश ६,८,१२ स्थानों में हो तो मनुष्य पुत्रहीन होता है, परन्तु यदि पञ्चमेश केन्द्र अथवा त्रिकोण में हो तो पुत्र लाभ सम्भव है ॥ २८ ॥

जब पञ्चमेश बृहस्पति हो, सूर्य शुभस्थान में हो और शुभ ग्रह केन्द्र अथवा ५,६ स्थानों में हो तो एक ही पुत्र होता है ॥ २६ ॥

जब पञ्चमेश छठे स्थान में नीच का हो और पञ्चम स्थान में केतु और बुध हों तो स्त्री काकवन्ध्या होती है (काकवन्ध्या उस स्त्री को कहते हैं जो जन्म भर में केवल एक ही बार गर्भवती हो) ॥ ३० ॥

जब पञ्चम स्थान में शनि और बुध हों तब भी स्त्री काकवन्ध्या होती है। जब पञ्चम स्थान में पाप ग्रह हों तो कष्ट से पुत्र होता है ॥३१॥

जब पञ्चम स्थान का स्वामी पञ्चम स्थान को न देखे तो पुत्र की चिन्ता होती है ॥ ३२ ॥

जब पञ्चम स्थान के स्वामी शुक्र, बृहस्पति अथवा बुध हों और बलवान् ग्रहों से युक्त अथवा दृष्ट हों तो बहुत से पुत्र होते हैं ॥ ३३ ॥

जब पञ्चम स्थान मे दो पापग्रह हों तो सन्तान की प्राप्ति नहीं होती है ॥ ३४ ॥

मङ्गल ऋतु है, शुक्र वीर्य्य है, ऋतु को वीर्य्य न देखे और वीर्य्य को ऋतु न देखे तो बहुत से विवाह करने पर भी सन्तान नहीं होती है ॥३५॥

जिस वर्ष मे ऋतु को वीर्य्य देखे और वीर्य को ऋतु देखे उस वर्ष मे गर्भ होना सम्भव है ॥ ३६ ॥

सुतेश और लग्नेश का तथा सप्तमेश और लग्नेश का जब समागम हो तब पुत्रलाभ होता है यह यवनाचार्य्य का वचन है ॥ ३७ ॥

विद्याविचारः

सुतपस्त्रिके:वाग्धीनो विद्याहीनश्च ॥
वागीश वाग्गृहाधीशौ षडादित्रयसंस्थितौ ।
मूकतां कुरुतोप्येवं पितृमातृगृहाधिपाः ॥

(अर्थ)

जिसका पञ्चमेश त्रिकस्थान में हो वह वाणी और विद्या से हीन होता है। बृहस्पति और पञ्चमेश यदि ६, ८, १२ स्थानों में स्थित हों तो मनुष्य गूंगा होता है। ऐसे ही पिता और माता के घर के स्वामी पूर्वोक्त स्थानों में स्थित हों तो पिता और माता गूंगे होते हैं ॥

पञ्चमस्थसूर्यादिफलानि

तातांम्बिकासोदरमातुलाश्च मातामहाःपितृपिताच सूनुः ।
सूर्यादि खेटैः खलुपञ्चमस्थै र्नश्यन्ति नूनं मुनयो वदन्ति ॥

(अर्थ)

यदि पञ्चम स्थान में सूर्य्य आदि ग्रह स्थित हों तो पिता, माता,

सहोदर भाई बहिन, मामा, नाना, दादा और पुत्रों का क्रम से नाश होता है ॥

बुद्धिः (देवसेवाच)

भृगुः पुत्रे मृदुर्बुद्धिः कुटिला राहुमन्दयोः ।
सुदेवसेवा सौम्ये च बहुदेवा च पापके ॥
शुभग्रहे साधुधर्मः प्रपञ्ची चाशुभग्रहे ।

(अर्थ)

यदि पञ्चम स्थान में शुक्र हो तो निर्मल बुद्धि होती है, यदि राहु और शनैश्चर हों तो कुटिल बुद्धि होती है ॥

यदि पञ्चम स्थान में सौम्य ग्रह हो तो मनुष्य अच्छे देवता का भक्त होता है । यदि पाप ग्रह हो तो बहुत देवताओं की पूजा करने वाला होता है ॥

यदि पञ्चम स्थान में शुभ ग्रह हो तो मनुष्य धर्म्म करने वाला होता है । पाप ग्रह हो तो प्रपञ्ची होता है ॥

सन्तानाधरोधकर्तॄणां ग्रहाणामुपायः ।

वंशाख्नेन रविः शशी शिवव्रता द्भौमस्तु गौर्य्यर्चना
त्सौम्यः सम्पुटकांस्यपात्रकनकै र्जीवस्तु पित्रर्चनात् ।
शुक्रो गोः प्रतिपालनात्प्रकुरुते सौरिस्तु मृत्युञ्जयात्
कन्यादानमखात्तमस्तु कपिलादानाच्छिखी सन्ततिम् ॥१॥
बालघाती च पुरुषो मृतवत्सः प्रजायते ।
ब्राह्मणोद्वाहनं तेन कर्तव्यं तस्य शुद्धये ॥२॥
श्रवणं हरिवंशस्य कर्तव्यं च यथाविधि ।
महारुद्रस्य जाप्यं वा कारयेच्च यथाविधि ॥३॥
शीतलैः सलिलैः शुद्धैः वस्त्रपूतैः सचन्दनैः ।
लक्षसंख्यघटैर्भक्त्या स्नापयेच्च महेश्वरम् ॥४॥

लक्षपुष्पैरर्चयित्वा धूपदीपादिभिस्तथा ।
चतुर्दशीव्रतं कुर्यान्निर्जलं वा स्त्रिया सह ॥५॥
सूर्यवारे व्रतं कुर्यादथवा जलवर्जितम् ।
सहस्रनामजापीच भवेदेवं प्रमुच्यते ॥६॥

(अर्थ)

यदि सूर्य्य के दोष से सन्तान न हो तो हरिवंश सुनना चाहिये, यदि चन्द्रमा का दोष हो तो शिवजी का व्रत करना चाहिये, यदि मङ्गल का दोष हो तो भगवती की उपासना करनी चाहिये, यदि बुध का दोष हो तो कांसे की थाली और सोने का दान करना चाहिये, यदि बृहस्पति का दोष हो तो पितरों का श्राद्ध (अर्थात् गयायात्रा आदि) करना चाहिये, यदि शुक्र का दोष हो तो गोमाता का सेवन करना चाहिये, यदि शनि का दोष हो तो मृत्युञ्जय का आराधन करना चाहिये, यदि राहु का दोष हो तो कन्यादान करना चाहिये, यदि केतु का दोष हो तो गोदान करना चाहिये। ऐसा करने से सन्तान हो जाती है (यदि दृढमूल कर्म्म न हों जिनका वर्णन पहिले अध्याय मे किया गया है) ॥१॥

जिस मनुष्य ने पूर्वजन्म में बालहत्या की हो उसकी सन्तान हो हो कर मर जाती है। उस पाप की शुद्धि के निमित्त उसको ब्राह्मण की कन्या का विवाह कराना चाहिये ॥ २ ॥

अथवा विधिपूर्वक हरिवंश की कथा सुननी चाहिये, अथवा विधिपूर्वक महारुद्र का जप कराना चाहिये (११ आवृत्ति रुद्रिय को रुद्र कहते हैं, उसके ११ गुने को अतिरुद्र कहते हैं, उसके ११ गुने को महारुद्र कहते हैं) ॥३॥

अथवा पवित्र और वस्त्र में छाने हुए चन्दन सहित शीतल जल के एक लाख घड़ों से शिवजी को भक्ति सहित स्नान करावे ॥४॥

लाख पुष्पों से तथा धूप दीप आदि से पूजन करे। अथवा चतुर्दशी के दिन अथवा रविवार को स्त्रीसहित निर्जल व्रत करे, अथवा सहस्रनाम का पाठ करे। ऐसा करने से मनुष्य पापों से मुक्त हो जाता है ॥६॥

पितृव्यादिनाशयोगाः

सोमार्कभूसुनुयमा व्ययस्था अम्बापितृभ्रातृसुतप्रणाशः ।
लग्नाच्छशाङ्काद्बहवस्तृतीये पापा यदि स्युः सहज प्रणाशः ॥१॥
सौरोऽह्नि रात्रौ तपनः पितृव्य स्तत्पापयोगाच्च पितृव्य नाश ।
रिपुस्मराष्टव्ययजन्मसंस्थाः पापाः पुन र्मातुलमृत्युदाः स्यु ॥२॥
चन्द्रे नभःस्थे हिबुके च पापे शुक्रे स्मरे स्यात्स्वकुलस्य हन्ता ।
येन ग्रहेण प्रवलेन योगो दृष्ट्या च मातुः पितुरप्यरिष्टम् ॥३॥
चन्द्रात् त्रिकोणगे सूर्ये मातुलो म्रियते ध्रुवम् ।
कुजात् त्रिकोणगे शुक्रे मातृमाता विनश्यति ॥४॥

(अर्थ)

जब व्ययस्थान में चन्द्रमा, सूर्य्य, मङ्गल अथवा शनि हो तो यथाक्रम माता, पिता, सहोदर भाई बहिन, तथा पुत्र का नाश होता है। लग्न से अथवा चन्द्रमा से तीसरे घर में बहुत पाप ग्रह हों तो भाई का नाश होता है॥१॥

यदि दिन में जन्म हो तो शनैश्चर और रात में जन्म हो तो सूर्य्य पितृव्य (चचा अथवा ताऊ) होता है। यदि वह पाप ग्रह युक्त हो तो पितृव्य का नाश होता है। ६, ७, ८, १२ और १ स्थानों में यदि पाप ग्रह हों तो मामा की मृत्यु होती है ॥२॥

दशमस्थान में चन्द्रमा हो, चतुर्थस्थान में पाप ग्रह हो, सप्तम स्थान में शुक्र हो तो मनुष्य अपने कुल का नाश करने वाला होता है। जिस बलवान् ग्रह से अथवा जिसकी दृष्टि मे माता के अरिष्ट का योग हो वसीसे पिता को भी अरिष्ट होता है ॥३॥

चन्द्रमा से त्रिकोण स्थान में सूर्य्य हो तो मामा की मृत्यु होती है। मङ्गल से त्रिकोण में शुक्र हो तो नाना की मृत्यु होती है ॥४॥

मातृपितृरिष्टयोगाः

रिपुस्थाने यदा पापा व्ययस्थाने च चन्द्रमाः ।
चतुर्थे मङ्गलो यस्य माता तस्य नजीवति ॥१॥
लग्नस्थाने यदा सौरिः शत्रुस्थाने च चन्द्रमाः ।
कुजश्च सप्तमस्थाने पितुस्तस्य च संशयः ॥२॥
चतुर्थे मातृहा पापो दशमे पितृहा भवेत् ।
सप्तमे भवने पापा मातृपितृविनाशकाः ॥३॥
द्वादशे रिपुभावेच यदा क्रूरो व्यवस्थितः ।
तदा मातुर्भयं विद्या च्चतुर्थे दशमे पितु ॥४॥
उच्चस्थो वापि नीचस्थः सप्तमस्थो यदा रविः ।
तदा जातो निहन्त्याशु मातरं नात्र संशयः ॥५॥
इन्दुतो नवमे द्यूने नैधने पापखेचराः ।
अखिलाः पितरं हन्यु र्वालं जातं समातृकम् ॥६॥
द्वादशाष्टमगे पापे लग्नेशे वलवर्जिते ।
जन्मकाले शिशुर्दुःखी सवालो मातृनाशक ॥
द्वितीये द्वादशे मातुश्चतुर्थे दशमे पितुः ॥७॥

(अर्थ)

जिसके शत्रु स्थान में पाप ग्रह हो, व्यय स्थान में चन्द्रमा हो, चतुर्थ स्थान में मङ्गल हो उसकी माता नहीं जीती है ॥ १ ॥

जिसके लग्न में शनि हो, शत्रु स्थान में चन्द्रमा हो, सप्तम स्थान में मङ्गल हो उसके पिता के जीने में सन्देह है ॥२॥

चतुर्थ स्थान में पाप ग्रह होने से माता का नाश होता है, दशम स्थान में पाप ग्रह होने से पिता का नाश होता है। सप्तम स्थान में पाप ग्रह होने से माता पिता दोनों का नाश होता है ॥३॥

जब बारहवें अथवा छठे घर में क्रूर ग्रह स्थित हो तो माता को भय

होता है, परन्तु जब चतुर्थ अथवा दशम स्थान में पाप ग्रह हो तो पिता को भय होता है ॥ ४ ॥

यदि सप्तम स्थान में सूर्य हो, चाहे वह उच्च का हो चाहे नीच का हो, तो बालक अपने माता का शीघ्र नाश करता है इसमें सन्देह नहीं है ॥ ५ ॥

चन्द्रमा से ६, ७, ८ स्थानो में सम्पूर्ण पाप ग्रह होने से पिता, माता तथा बालक का नाश होता है ॥६॥

१२, ८, स्थानो मे पाप ग्रह हो और लग्नेश बलहीन हो तो बालक दुःखी होता है और माता का नाश करता है।

कोई आचार्य्य कहते हैं कि दूसरे और बारहवे स्थान में पाप ग्रह होने से माता का नाश होता है, चौथे और दसवें स्थान में पाप ग्रह होने से पिता का नाश होता है ॥७॥

दारहायोगाः

कामार्थपतिसम्बन्धिभुक्तौ परिणयं भवेत्।
शुक्रेन्दुलग्नतः कामनाथस्य च दशाथवा ॥१॥
पत्नीस्थानगतो राहुः पापयुग्मेन वीक्षितः।
पत्नीयोगस्तदा नस्याद् भूत्वापि म्रियतेऽचिरात् ॥२॥
षष्ठे च भवने भौमः सप्तमे राहुसम्भवः।
अष्टमे च यदा सौरि स्तस्य भार्या न जीवति ॥३॥
यदा शनिः सप्तमवेश्मसंस्थितः
सूर्येण दृष्टो रविणा युतोवा।
तस्यैव भार्या म्रियते च नूनं
सुखं च नाप्नोति तदा कलत्रात् ॥४॥
यदासप्तमे चान्तिमे लग्नगेहे स्थिता पापखेटाः सुतेक्षीणचन्द्रः।
तदा पुत्रभार्याविहीनस्य योगः।
यदाकन्यकालग्नगासप्तमार्किस्तदाकामिनीनाशमायातिनूनम् ५

पापग्रहे कर्मगतेऽतिनीचे वक्रान्विते पापखगैः प्रदृष्टे ।
नाशं कलत्रस्य वदन्ति नूनं मुनीश्वरास्तद्वदनेकशास्त्रैः ॥६॥
लाभेशे मदगृहगेऽथरन्ध्रयाते नो जीवेदिह वनिता नरस्य कापि॥
शुक्रज्ञौ द्यूने दारहीनः ॥७॥
पापा लग्नास्तान्त्यगाः सुतस्त्रीनाशकाः ।
द्यूनेऽङ्गेशे भार्याहीनो वा विरक्त ॥८॥
सप्तमे तु स्थिते शुक्रेऽतीव कामी भवेन्नर. ।
यत्र कुत्र स्थिते पाप युते स्त्रीमरणं भवेत् ॥६॥

(अर्थ)

जब सप्तमेश तथा द्वितीयेश की दशा का भोग हो तब विवाह होता है, अथवा शुक्र चन्द्रमा या लग्न से जो सप्तमेश हो उसकी दशा मे विवाह होता है ॥ १ ॥

जब सप्तम स्थान में राहु हो और दो पाप ग्रह उसको देखें तो विवाह का योग नही होता है । यदि विवाह हो भी जावे तो शीघ्र पत्नी की मृत्यु हो जाती है ॥२॥

जिसके छठे घर में मङ्गल हो, सातवे घर मे राहु हो और आठवें घर में शनि हो उसकी स्त्री नहीं जीती है ॥३॥

जिसके सातवें घर में शनि हो, सूर्य्य से दृष्ट अथवा युक्त हो, उसकी स्त्री मर जाती है और स्त्री का सुख उसे नहीं मिलता है ॥४॥

जिसके सातवें या बारहवें घरमें या लग्न में पाप ग्रह हों और पुत्र भाव में क्षीण चन्द्रमा हो वह स्त्रीपुत्ररहित होता है ।

जब लग्न में कन्या राशि हो, सातवां शनि हो तो स्त्री का नाश होता है ॥ ५ ॥

जब कर्म स्थान में पाप ग्रह अति नीच होकर बैठे और वह वक्री ग्रह से युक्त तथा पाप ग्रह से दृष्ट हो तो स्त्री का नाश होता है ॥६॥

जब लाभेश सातवें या आठवें घर में हो तो मनुष्य की कोई भी स्त्री नहीं जीती है॥ जब शुक्र और बुध सप्तम स्थान में हों तो मनुष्य स्त्री रहित होता है ॥ ७ ॥

जब लग्न, सप्तम और द्वादश स्थानों में पापग्रह हों तो पुत्र और स्त्री का नाश करते हैं। जब लग्नेश सप्तम स्थान में हो तो मनुष्य भार्य्या हीन अथवा विरक्त होता है ॥८॥

जब सप्तम स्थान में शुक्र हो तो मनुष्य अतिकामी होता है। पाप ग्रह युक्त शुक्र जिस किसी स्थान में भी स्थित हो तो स्त्री की मृत्यु होती है ॥९॥

भाग्यभावः

विहाय सर्वं गणकैर्विचिन्त्यं भाग्यालयं केवलमेव यत्नात् ।
आयुश्च माता च पिता च वंशो भाग्यान्विते नैव भवन्ति धन्याः ॥१॥
भाग्यादेव नृणां सिद्धिर्भाग्यादेव धनार्थतिः।
यशांसि भाग्यतो भाग्यविपर्यासाद्विपर्ययः ॥२॥
नवे क्रूरयुक्तःसपापोनर स्यात्ससौम्येभवेत्पुण्यशीलैश्च युक्तः ॥३॥
यदा भाग्यगेहं भवेत्क्रूरयुक्तं तदा भाग्यहीनं वदन्ति प्रवीणाः।
तथाभाग्यपो भाग्यगेहेनराणां त्रिकोणेधने केन्द्रकेवासुभाग्य. ॥४॥
यदाचन्द्रमानीचगोमानवानां तदाभाग्ययोगाचिनष्टाश्च सर्वे ॥५॥
यदा देवपूज्यो मृगे यस्यतिष्ठेत् तदा तस्य गेहे दरिद्रस्य वासः।
तथाभार्गवोनीचगोवायदास्यात्तदाभाग्यहीनंनरंतं वदन्ति ॥६॥
लग्नादिन्दोश्च नवमं भाग्यं बलवशाद्भवेत् ।
शुभपापारिमित्राख्यै ग्रंहैरेवं शुभाशुभे ॥७॥
उच्चादि पंचका वृद्धि (उच्च मूल त्रिकोण. स्वक्षं. मित्र. अधिमित्र)
रन्यस्माद्धानिरुच्यते (सम. शत्रु. अधिशत्रु. नीच) ॥८॥

स्वस्मिन्नन्यत्र विषये स्वदेशेतरदेशयोः ।
स्वेष्वन्येषु तु वर्गेषु ज्योतिर्विद्भिस्तु स्थितैः ॥६॥
भाग्यत्रिकोणोपगतैः शुभं स्याद्भाग्यंतु केन्द्रोपगतैः शुभैश्च ।
पापैस्तथास्यादशुभंचभाग्यंमित्रादिभि ःस्यान्नियमो विशिष्टात्।१०।
एवं भाग्यविपर्यासौ भावानां च वदेत्सदा ॥
लग्नेशेऽङ्के भाग्यवान् ॥११॥
भाग्याधिपश्चेद्यदि केन्द्रसंस्थश्चाद्ये वयस्येव सुखोदयःस्यात्।
त्रिकोणगः स्वोच्चगतोऽथवा चेन्मध्ये वयस्येव फलप्रदःस्यात्॥
भाग्याधिनाथः स्वगृहेऽथ मित्रगृहेऽथवास्याद्वयसोन्त्यभागे ।१२।
क्रूरा धर्मे धर्महीनं कर्कशं चपलं तथा ।
सौम्याः कुर्वन्ति भाग्याढ्यं दयालुं प्रियभाषिणम् ॥१३॥
भाग्याधिनाथोऽपिच भाग्यकर्ता शुक्रोऽपि पापैः सहचेत्त्रिपुस्यात्।
षडादिभावेषुचभाग्यहीनंकेन्द्रत्रिकोणायगतोऽतिभाग्यम् ॥१४।

(अर्थ)

ज्योतिषी को चाहिये कि सब बातों को छोड कर केवल भाग्य स्थान का विचार यत्नपूर्वक करे, क्योंकि भाग्यवान् पुत्र के होने से आयु, माता पिता और वंश धन्य होते हैं ॥१॥

मनुष्यों की सिद्धि भाग्य ही से होती है, धन की प्राप्ति भाग्य ही से होती है, यश भी भाग्य ही से मिलता है। भाग्य विपरीत होने से सब बातें विपरीत होती हैं ॥२॥

नवें स्थान में क्रूर ग्रह होने से मनुष्य पापी होता है, परन्तु सौम्य ग्रह होने से धर्मात्मा होता है ॥३॥

जब भाग्य स्थान क्रूर ग्रह से युक्त हो तो मनुष्य भाग्य हीन होता है। जब भाग्य स्थान, त्रिकोण, धनस्थान, अथवा केन्द्र में भाग्येश हो तो मनुष्य बडा भाग्यवान् होता है ॥४॥

जब मनुष्यों के जन्म समय में चन्द्रमा नीच का हो तो सब भाग्य योगों का नाश हो जाता है ॥५॥

जिसके जन्म समय में मकर का बृहस्पति हो उसके घर में दारिद्रय का वास होता है। ऐसे ही जन्म समय में शुक्र नीच का हो तब भी मनुष्य भाग्यहीन होता है ॥६॥

लग्न अथवा चन्द्रमा से नवम स्थान भाग्य का स्थान होता है। शुभ ग्रह, पापग्रह, शत्रु ग्रह अथवा मित्र ग्रह होने से शुभ अथवा अशुभ फल कहना चाहिये ॥७॥

उच्च, मूल त्रिकोण, स्वक्षेत्री, मित्र, अधिमित्र ग्रह होने से भाग्य की वृद्धि होती है। सम, शत्रु, अधिशत्रु अथवा नीच ग्रह होने से भाग्य की हानि होती है ॥८॥

षड्वर्ग का विचार करके इस तरह से फल कहना चाहियेः—अपने देश में, परदेश में, अपने देश में, परदेश में, अपने देश में, परदेश में भाग्य की वृद्धि होती है ॥९॥

जब भाग्य भाव त्रिकोण, अथवा केन्द्र में शुभ ग्रह हों तो मनुष्य भाग्यवान् होता है, परन्तु जब उन स्थानों में पाप ग्रह हों तो अशुभ फल होता है। मित्र आदि ग्रह होने से वैसा ही फल कहना चाहिये ॥१०॥

इसी प्रकार से भाग्य का विपर्यास भी जानना चाहिये।

जब लग्नेश भाग्य स्थान में हो तो मनुष्य भाग्यवान् होता है ॥११॥

जब भाग्येश केन्द्र में हो तो बाल्यावस्था में सुख मिलता है, जब त्रिकोण में हो अथवा उच्च का हो तो युवावस्था में सुख मिलता है। जब भाग्येश अपने घर में अथवा मित्र के घर में हो तो वृद्धावस्था में सुख मिलता है ॥१२॥

जब धर्म स्थान में क्रूर ग्रह हों तो मनुष्य धर्महीन, कठोर और चपल होता है।

जब भाग्य स्थान में सौम्य ग्रह हों तो मनुष्य भाग्यवान्, दयालु और मीठा बोलने वाला होता है ॥१३॥

जब भाग्येश अथवा शुक्र ६, ८, १२ स्थानों मे हों तो मनुष्य भाग्य हीन होता है। परन्तु जब केन्द्र अथवा त्रिकोण में हो तो मनुष्य भाग्यवान् होता है ॥ १४ ॥

लाभविचारः

शीतांशुवित्तेश्वरलग्ननाथाः परस्परं सयुतवीक्षितावा ।
धनत्रिकोणोदयगा यदा स्युस्तदार्थलाभं प्रवदेन्नराणाम् ॥१॥
लग्नलाभपती लग्ने लाभे वा लग्नलाभपौ ।
लग्ने लाभाधिपो वापि लाभे लग्नाधिपो भवेत् ॥२॥
एकोऽपि हि यदा योगस्तदा लाभश्च निश्चितम् ।
चन्द्र योगे विशेषेण ॥३॥
लग्नलाभपयोर्दृष्टि र्लाभे लाभकरी मता ।
लाभः सर्वखगैर्दृष्टो लाभः पूर्णो भवेत्तदा ॥४॥
चरलग्नेशुभैर्युक्ते लाभे चन्द्रे वलान्विते ।
त्रिकोणकेन्द्रगैः सौम्यै र्लाभो भवति तत्क्षणात् ॥५॥
केन्द्रगो यदि लग्नेशः शुभदृष्टयुतोऽपिवा ।
लग्नपो वा त्रिकोणस्थ श्चन्द्रोऽङ्के क्षेमकृत्तदा ॥६॥
चरे दूरं विजानीयात्स्थिरे लाभ· स्वमन्दिरे ।
द्विस्वभावे वहिर्लाभो ग्रहयोगवशाद्भवेत् ॥७॥

(अर्थ)

जब चन्द्रमा, धनेश और लग्नेश परस्पर युक्त हों अथवा एक दूसरे को देखते हों और वे धनस्थान, त्रिकोण तथा लग्न में बैठे हों तो मनुष्यों को धन का लाभ होता है ॥ १ ॥

लग्नेश और लाभेश लग्न मे हो, अथवा लग्नेश और लाभेश लाभ स्थान में हों, अथवा लाभेश लग्न में हो और लग्नेश लाभ में हो ॥ २ ॥

पूर्वोक्त योगों में से जब एक भी योग हो तो निश्चय से लाभ होता है। यदि चन्द्रमा का योग हो तो विशेष लाभ होता है ॥ ३ ॥

लग्नेश और लाभेश की दृष्टि लाभ स्थान में हो तो लाभ होता है। जब लाभ स्थान को सब ग्रह देखें तो पूर्ण लाभ होता है ॥४॥

जब चर लग्न हो और शुभ ग्रहों से युक्त हो, तथा लाभ स्थान में चन्द्रमा बलवान् होकर बैठे और त्रिकोण तथा केन्द्र में सौम्य ग्रह हों तो उसी क्षण से लाभ होता है ॥५॥

जब लग्नेश केन्द्र में हो अथवा शुभ ग्रहों से दृष्ट अथवा युक्त हो, अथवा लग्नेश त्रिकोण में हो, चन्द्रमा भाग्य स्थान में हो तो शुभ होता है ॥६॥

चर लग्न होने से दूर देश में लाभ होता है। स्थिर लग्न होने से अपने घर ही में लाभ होता है। द्विस्वभाव लग्न होने से घर के बाहर लाभ होता है। जैसा योग हो उसके अनुसार फल कहना चाहिये ॥७॥

(७) उच्चादिफलप्रकरणम्

जन्मलग्नफलम्

मेषेत्वगम्यागमनप्रियश्च त्वभक्ष्यभक्षो वृषभे सुशील ।
देवेशदेवालयधर्मकारी युग्मे विरक्तोऽपि धनैर्विहीनः ॥१॥
चान्द्रे च तीव्रं प्रकरोति पापं परस्वहर्तापि च पूर्तकारी ।
सिंहे तु देवस्य विघातकारी पाथोनके धर्मरतिः सुकृत्यः ॥२॥
जूके परेषां धनदश्च पूर्तं करोति चापे च तु वृश्चिकेतु ।
परस्वहर्ता परदारसक्तो मृगेऽपि चैवं घटभे कृतज्ञ ॥
यज्ञस्य कर्ता झषभे तथैव पूर्तादिकारी बहुयोजकः स्यात् ॥३॥

(अर्थ)

मेष लग्न में जन्म होने से मनुष्य अगम्यागमन करता है और अभक्ष्य भक्षण करता है। वृष लग्न में अच्छे स्वभाव वाला, देवताओं को पूजने वाला,

मन्दिर बनाने वाला और धर्म्म करने वाला होता है । मिथुन लग्न में विरक्त और धन हीन होता है ॥१॥

कर्क लग्न में बडा पापी, पराया धन हरने वाला और तालाव आदि बनाने वाला होता है । सिंह लग्न में देवताओं के कार्य्य में विघ्न करने वाला होता है । कन्या लग्न में धर्म में प्रीति रखने वाला और अच्छा कर्म करने वाला होता है ॥२॥

तुला लग्न मे औरों को धन देने वाला होता है । धन लग्न में तालाव आदि बनाने वाला होता है । वृश्चिक लग्न मे पराया धन हरने वाला और पराई स्त्री में आसक्त होता है । मकर लग्न में भी यही फल होता है । कुम्भ लग्न मे कृतघ्न अर्थात् किये हुए उपकार को मानने वाला होता है । मीन लग्न मे यज्ञ करने वाला, तालाव आदि बनाने वाला और बहुत आद-मियो को नौकर रखने वाला होता है ॥३॥

उच्चादित्रयफलम्

त्रिभिः स्वस्थै र्भवेन्मन्त्री त्रिभिरुच्चैर्नराधिपः ।
त्रिभिर्नीचैर्भवेद्दास स्त्रिभिरस्तंगतैर्जडः ॥

(अर्थ)

जब ३ ग्रह अपने घर के हों तो मनुष्य मन्त्री होता है । जब ३ ग्रह उच्च के हों तो राजा होता है । जब ३ ग्रह नीच के हो तो दास होता है । जब ३ ग्रह अस्त के हों तो जड़ होता है ।

उच्च मित्र शत्रु नीचस्थ फलानि

जन यति नृप मेकोऽप्युच्चगो मित्रदृष्टः
प्रचुरधनसमेतं मित्रयोगाच्च सिद्धम् ।
विवसुविसुखमूढव्याधिता बन्धुतप्ता
वधदुरितसमेताः शत्रुनिम्नर्क्षगेषु ॥

(अर्थ)

यदि एक भी ग्रह उच्च का हो तो मनुष्य राजा होता है । मित्र से दृष्ट हो

तो बडा धनवान् होता है। मित्र के साथ ग्रह बैठा हो तो सिद्धि होती है। जब ग्रह शत्रु के घरमें अथवा नीच के हो तो मनुष्य धन हीन, सुख रहित, मूर्ख, रोग युक्त, बान्धवों से दुःखित तथा पाप युक्त होते हैं ॥

उच्च मित्रस्थो ग्रहः षष्ठादित्रयविनानदोषकृत्

दोषकृन्नच सर्वत्र स्वोच्चस्वर्क्षगतो ग्रहः।
षष्ठादित्रयसंस्थश्चेत्तद्विना दीपकृच्छुभः ॥

(अर्थ)

जब ग्रह अपने उच्च अथवा अपने घर का हो तो दोष करने वाला नहीं होता है। ६, ८, १२ स्थानों को छोड कर अन्यत्र शुभ होता है ॥

उच्चस्थ ग्रहफलम्

महाधनी महोग्रश्च तुङ्गस्थे भास्करे नरः।
सुभूषणो महाभोगी धनी तुङ्गे निशाकरे ॥१॥
उच्चे भौमे सुपुत्रश्च तेजस्वी गर्वितो नरः।
मेधावी दृढवाक्यश्च बलाढ्यश्च बुधे भवेत् ॥२॥
राजपूज्यश्च विख्यातो विद्वानार्यो गुरौ नरः।
स्वोच्चे शुक्रे विलासी च हास्यगीतादिसंयुतः ॥३॥
स्वोच्चगे रविपुत्रे च चक्रवर्ती धनी भवेत्।
राजलब्धनियोगश्च राहुः शनिस्समो मतः ॥४॥

(अर्थ)

जब सूर्य उच्च का हो तो मनुष्य बडा धनवान् और उग्रस्वभाव वाला होता है। जब चन्द्रमा उच्च का हो तो मनुष्य अच्छे आभूषण वाला, बडा भोग करने वाला तथा धनवान् होता है ॥१॥

जब मङ्गल उच्च का हो तो मनुष्य अच्छे पुत्र वाला, तेजस्वी और घमण्डी होता है। जब बुध उच्च का हो तो मनुष्य बुद्धिमान्, बलवान् और दृढ बातका वाला होता है ॥ २ ॥

जब बृहस्पति उच्चका हो तो मनुष्य राजपूज्य, प्रसिद्ध, पण्डित और श्रेष्ठ होता है। जब शुक्र उच्च का हो तो मनुष्य विलास वाला, बहुत हंसने वाला और गायन विद्या में प्रीति रखने वाला होता है ॥ ३ ॥

जब शनैश्चर अपने उच्च का हो तो मनुष्य चक्रवर्ती, धनवान् और बडे ओहदे में होता है। राहु का फल शनि के समान है ॥४॥

उच्चगत पापग्रह फलम्

पापैरुच्चगतैर्जाता न भवन्ति नराधिपाः।
किन्तु वित्तान्वितास्ते स्युः क्रोधनाः कलहप्रियाः॥

(अर्थ)

जब पाप ग्रह उच्च के हों तो मनुष्य राजा नहीं होते हैं, परन्तु वे धनवान्, बडे क्रोधी और कलह में प्रीति रखने वाले होते हैं॥

बलयुत सौम्य पाप ग्रह फलम्

आचार सत्य शुभ शौच युताः सुरूपा
स्तेजस्विनः स्मृतिविदो द्विजदेवभक्ताः।
सद्वस्त्र माल्य जल भूषण संप्रियाश्च
सौम्यग्रहैर्वलयुतैः पुरुषा भवन्ति ॥१॥
लुब्धाः कुकर्म निरता निजकार्यनिष्ठाः
पापान्विताः सकलहाश्च तमोऽभिभूताः।
क्रूराः शठा वधिरतामलिना. कृतघ्नाः
पापग्रहै र्वलयुतैः पिशुनाः कुरूपाः ॥२॥

(अर्थ)

जिन मनुष्यों के सौम्य ग्रह बलवान् हो वे सदाचार वाले, सत्यता तथा शौच से युक्त, रूपवान्, तेजस्वी, स्मृति जानने वाले, ब्राह्मण और देवताओं के भक्त, अच्छे वस्त्र, माला तथा आभूषण के प्रिय होते हैं॥१॥

जिन लोगों के पापग्रह बलवान् हो वे लोभी, कुकर्म करने वाले,

अपना काम सिद्ध करने वाले, पापी, झगडालू, तमोगुणी, क्रूर, शठ, किसी की न सुननेवाले, कृतघ्न, चुगलखोर और कुरूप होते हैं ॥ २ ॥

नीचस्थग्रहफलम्

नीचे सूर्ये भवेत्प्रेष्यो बन्धुभिर्वर्जितो नरः ।
चन्द्रे रोगी स्वल्पपुण्यो दुर्भगो नीचराशिगे ॥१॥
नीचे भौमे भवेन्नीच कुत्सितो व्यसनातुरः ।
बुधे क्षुद्रो बन्धुवैरी गुरौ दीनो मलान्वितः ॥२॥
शुक्रे नीचे नष्टदारः स्वतन्त्रः शीलवर्जितः ।
शनौ काणो दरिद्रश्च ॥३॥

(अर्थ)

जिस मनुष्य के जन्म समय में सूर्य नीच का हो वह दास होता है और बान्धवों से वर्जित होता है । चन्द्रमा नीच का हो तो मनुष्य रोगी, धर्महीन तथा दुर्भाग्य होता है ॥१॥

जब मङ्गल नीच का हो तो मनुष्य नीच, कुत्सित और व्यसनी होता है । जब बुध नीच का हो तो मनुष्य क्षुद्र बुद्धिवाला, बान्धवों से वैर करने वाला होता है । जब बृहस्पति नीच का हो तो मनुष्य दुःखी और मलिन होता है ॥२॥

जब शुक्र नीच का हो तो मनुष्य स्त्री रहित, स्वेच्छाचारी, और शील रहित होता है । जब शनि नीच का हो तो मनुष्य काना और दरिद्री होता है ॥३॥

स्वगृहस्थग्रहफलम्

स्वगृहस्थे रवौ लोके महोग्रश्च महाधनी ।
चन्द्रे धर्मरत साधुर्मनस्वी रूपवानपि ॥१॥
स्वगृहस्थे कुजे मल्लो धनवानपराजितः ।
बुधे नानाकलाभिज्ञ. पण्डितो धनवान्नरः ॥२॥

केन्द्रस्थ ग्रह फलम्

सूर्यकेन्द्रे राजसेवी वैश्यवृत्तिर्निशाकरे ।
शस्त्रवृत्तिः कुजे शूरो बुधे चाध्यापको भवेत् ॥१॥
स्वानुष्ठानरतो नित्यं दिव्यवुद्धिर्नरो गुरौ ।
शुक्रे विद्यार्थसंपन्नो नीचसेवी शनैश्चरे ॥२॥

(अर्थ)

जब सूर्य्य केन्द्र में हो तो मनुष्य राजा की सेवा करने वाला होता है। जब चन्द्रमा केन्द्र में हो तो मनुष्य वैश्य वृत्ति वाला होता है। जब मङ्गल केन्द्र में हो तो मनुष्य शस्त्र का व्यापार करने वाला और शूर होता है। जब बुध केन्द्र में हो तो मनुष्य अध्यापक अर्थात् पढ़ाने वाला होता है ॥१॥

जब बृहस्पति केन्द्र में हो तो मनुष्य अपने अनुष्ठान में तत्पर और दिव्य बुद्धि वाला होता है। जब शुक्र केन्द्र में हो तो मनुष्य विद्या और धन से युक्त होता है। जब शनैश्चर केन्द्र में हो तो मनुष्य नीच की सेवा करने वाला होता है ॥ २ ॥

केन्द्रस्थपापग्रहफल विशेषेण

केन्द्रस्थिता जन्मनि यस्य कस्य पापाश्च सर्वे विफलप्रदाः स्युः ।
कुर्वन्ति दारिद्र्य मनेकदुःखं श्वासक्षयप्लीहगुदोदरार्त्तिम् ॥१॥
दुःखी मूढो लोकविद्वेषकारी काणः पङ्गुर्निर्धनो मानहीनः ।
अल्पायुः स्यात्केन्द्रगाः पापखेटा ब्रह्मद्वेषी चापकीर्तिश्च सर्वे ॥२॥
लग्ने माने सप्तमे चाथ बन्धौ पापाः खेटा जन्मकालेतु सर्वे ।
तिष्ठन्त्येते स्वल्पमायुः प्रमाणं तेषामेको लग्नपो वा यदि स्यात् ॥३॥

(अर्थ)

जिस मनुष्य के केन्द्र में पाप ग्रह हों वे सब खराब फल देने वाले होते हैं। दारिद्र्य, अनेक प्रकार का दुःख, श्वास, क्षय, खांसी, गुदा और उदर में रोग करते हैं ॥ १ ॥

जब केन्द्र में पाप ग्रह हों तो मनुष्य दुःखी, मूर्ख, लोगों से झगडा करने वाला, काना, लूला, निर्धन, मानहीन, और अल्पायु होता है। यदि सब पाप ग्रह केन्द्र में हों तो मनुष्य ब्रह्मद्वेषी और अपयश वाला होता है ॥२॥

जब जन्म काल में सब पाप ग्रह लग्न, दशम, सप्तम, चतुर्थ स्थानों में स्थित हों तो आयु कम होती है, चाहे उनमें से एक लग्नेश भी क्यों न हो ॥ ३ ॥

सूचना।

जैसे ही उच्च से सप्तम नीच होता है और उसका फल अशुभ होता है ऐसे ही अपने घर से सप्तम स्थान को अंग्रेजी ज्योतिषी "हानि कारक" स्थान कहते हैं और उसका फल भी अशुभ कहते हैं। इसके मूल वचन का पता नहीं लगा है ॥

(८) पुरुष जातक प्रकरणम्

पुरुष जातकम्

लग्नस्थितोदिनपतिः कुरुतेऽङ्गपीडां
पृथ्वीसुतो वितनुते रुधिरप्रकोपम्।
छायासुतः प्रकुरुते बहुदुःखभाजं
जीवेन्दुभार्गवबुधा सुखकान्तिदाः स्युः ॥ १ ॥
दुःखावहा धनविनाशकराः प्रदिष्टा
वित्ते स्थिता रविशनैश्चरभूमिपुत्राः।
चन्द्रो बुधः सुरगुरुर्भृगुनन्दनो वा
नानाविधं धनचयं कुरुते धनस्थः ॥२॥
भानुः करोति निरुजं रजनीकरोऽपि
क्लीवां युतं शनिसुतः प्रचुरप्रकोपम्।

ऋद्धिं बुधः सुधिषणं सुविनीतवेषं
स्त्रीणां प्रियं गुरुरवी कविजस्तृतीये ॥ ३ ॥
आदित्यभौमशनयः सुखवर्जिताङ्गं
कुर्वन्ति जन्मनि नरं सुचिरं चतुर्थे ।
सोमो बुधः सुरगुरुर्भृगुनन्दनो वा
सौख्यान्वितं च नृपकर्मरतप्रधानम् ॥ ४ ॥
पुत्रे रविः प्रचुरकोपयुतं बुधश्च
स्वल्पात्मजं शनिधरातनुजावपुत्रम् ।
शुक्रेन्दुदेवगुरवः सुतधामसंस्थाः
कुर्वन्ति पुत्रबहुलं सुखिनं सुरूपम् ॥ ५ ॥
मार्तण्डभूमितनयौ हतशत्रुपक्षं
पङ्गुर्नरं रिपुगृहेष्वतिपूजनीयम् ।
काव्येन्दुजौ मतिविहीन मनल्परोगं
जीवः करोति विकलं मरणं शशाङ्कः ॥६॥
तिग्मांशुभैामरविजाः किल सप्तमस्था
जायां कुकर्मनिरतां तनुसन्ततिं च ।
जीवेन्दुभार्गवबुधा बहुपुत्रयुक्तां
रूपान्वितां जनमनोहररूपशीलाम् ॥७॥
सर्वे ग्रहा दिनकरप्रमुखा नितान्तं
मृत्युस्थिता वितनुते किल दुष्टबुद्धिम् ।
शस्त्राभिघातपरिपीडितगात्रयष्टिं
सौख्यैर्विहीनमतिरोगगणैरुपेतम् ॥ ८ ॥
(सूर्यादिनवखेटाः सुमृत्युस्थाने यदा तदा ।
विरुद्धं फलमेवस्या न्नात्र कार्या विचारणा ॥)

धर्मस्थिता रविशनैश्चरभूमिपुत्रा
कुर्वन्ति धर्मरहितं विमतिं कुशीलम्।
चन्द्रो बुधो भृगुसुतः सुरराजमन्त्री
धर्मक्रियासु निरतं कुरुते मनुष्यम् ॥९॥
आदित्यभौमशनयः किल कर्मसंस्थाः
कुर्युर्नरं बहुकुकर्मरतं कुपुत्रम्।
चन्द्रः सुकीर्तिमुशना बहुवित्तयुक्तं
रूपान्वितं बुधगुरू शुभकर्मभाजम् ॥ १० ॥
लाभस्थितो दिनकरो नृपलाभयुक्तं
तारापतिर्बहुधनं क्षितिज क्षितीशम्।
सौम्यो विवेकसुभगं च धनायुपीज्यः
शुक्रः करोति सगुणं रविजः सुकीर्तिम् ॥ ११ ॥
सूर्यः करोति पुरुषं व्ययगो विशीलं
काणं शशी क्षितिसुतो बहुपापभाजम्।
चन्द्राङ्गजोगतधनं धिषण कृशाङ्गं
शुक्रो बहुव्ययकरं रविजः सुतीव्रम् ॥ १२ ॥

(अर्थ)

जब सूर्य लग्न में हो तो शरीर में पीड़ा होती है। मङ्गल हो तो रुधिर का प्रकोप होता है। शनि हो तो बहुत दुःख मिलता है। बृहस्पति, चन्द्रमा, शुक्र अथवा बुध हों तो सुख और कान्ति को देते हैं ॥१॥

जब धनस्थान में सूर्य, शनि अथवा मङ्गल हों तो दुःख देते हैं और धन का नाश करते हैं। परन्तु जब चन्द्रमा, बुध, बृहस्पति अथवा शुक्र हों तो अनेक प्रकार का धन सञ्चय कराते हैं ॥ २ ॥

जब तृतीय स्थान में सूर्य हो तो मनुष्य रोग रहित होता है। चन्द्रमा हो तो मनुष्य कीर्तिमान् होता है। मङ्गल हो तो मनुष्य बड़ा क्रोधी होता है।

बुध हो तो मनुष्य बडी समृद्धि वाला होता है। जब बृहस्पति हो तो मनुष्य अच्छी बुद्धि वाला होता है। जब सूर्य हो तो मनुष्य नम्र स्वभाव वाला होता है। जब शुक्र हो तो मनुष्य स्त्रियों का प्रिय होता है ॥३॥

जब चतुर्थ स्थान में सूर्य्य, मङ्गल अथवा शनि हों तो शरीर में सुख नहीं मिलता है। जब चन्द्रमा, बुध, बृहस्पति अथवा शुक्र हों तो मनुष्य सुख से युक्त और राजकार्य्य मे प्रधान होता है ॥४॥

जब पञ्चम स्थान में सूर्य्य, हो तो मनुष्म बड़ा क्रोधी होता है। बुध हो तो पुत्र कम होते हैं। शनि अथवा मङ्गल हों तो मनुष्य पुत्रहीन होता है। जब शुक्र, चन्द्रमा अथवा बृहस्पति हों तो बहुत पुत्र होते हैं और मनुष्य सुखी और रूपवान् होता है ॥ ५ ॥

जब छठे घर में सूर्य्य अथवा मङ्गल हो तो शत्रु का नाश होता है। यदि शनि हो तो शत्रु के घर में मनुष्य की बडी पूजा होती है। यदि शुक्र और बुध हों तो मनुष्य बुद्धिहीन और बडा रोगी होता है। यदि बृहस्पति हो तो मनुष्य का चित्त विकल रहता है। चन्द्रमा हो तो मृत्यु करता है ॥६॥

जब सप्तम स्थान में सूर्य्य, मङ्गल अथवा शनि हो तो मनुष्य की स्त्री कुकर्म में तत्पर रहती है और उसकी सन्तान कम होती है। जब बृहस्पति, चन्द्रमा, शुक्र अथवा बुध हो तो स्त्री के बहुत पुत्र होते हैं तथा स्त्री रूपवती और अच्छे स्वभाव वाली होती है ॥७॥

सूर्य्य आदि ग्रह जब अष्टम स्थान मे हों तो मनुष्य दुष्ट बुद्धि, सुख रहित, तथा अति रोगी होता है और उसके शरीर में शस्त्र की चोट के घाव होते हैं ॥८॥

(जब मृत्यु स्थान में सूर्य्य आदि ग्रह हों तो विरुद्ध फल होता है इसमें सन्देह नहीं है ॥)

जब धर्म्म स्थान में सूर्य्य, शनि अथवा मङ्गल हो तो मनुष्य धर्महीन,

कुमति और कुशील होता है, परन्तु जब चन्द्रमा, बुध, शुक्र अथवा बृहस्पति हो तो मनुष्य धर्म्म के कार्य्यों में तत्पर रहता है ॥९॥

जब कर्म स्थान में सूर्य्य, मङ्गल अथवा शनि हो तो मनुष्य बहुत कुकर्मों में प्रीति रखने वाला होता है और उसके पुत्र कुत्सित होते हैं। जब चन्द्रमा हो तो अच्छे यश वाला होता है। शुक्र हो तो बहुत धन से युक्त होता है। बुध हो तो रूपवान् होता है। बृहस्पति हों तो शुभ कर्म करने वाला होता है ॥१०॥

जब लाभ स्थान में सूर्य्य हो तो राजा से लाभ होता है। चन्द्रमा हो तो मनुष्य बड़ा धनी होता है। मङ्गल हो तो पृथ्वी का स्वामी होता है। बुध हो तो बड़ा विवेकी होता है। बृहस्पति हो तो धनवान् तथा दीर्घायु होता है। शुक्र हो तो गुणवान् होता है। शनि हो तो बड़ी कीर्ति वाला होता है ॥११॥

जब व्यय स्थान में सूर्य्य हो तो मनुष्य सदाचार से रहित होता है। चन्द्रमा हो तो काना होता है। मङ्गल हो तो बड़ा पापी होता है। बुध हो तो धन रहित होता है। बृहस्पति हो तो दुबला पतला होता है। शुक्र हो तो बहुत खर्च करने वाला होता है। शनि हो तो बड़ा तीव्र स्वभाव होता है ॥१२॥

राहुफलम्.

जन्मस्थो भूरिदुःखं धनभवनगतो वित्तनाशङ्करोति
दुश्चिक्ये भूपपूजां सुहृदि विनयं भ्रातृमित्रादिहानिम्।
पुत्रभ्रंशं सुतस्थो रिपुभवनगतः शत्रुसन्तापहानिं
जायास्थः स्त्रीविनाशं निधनभवनगतः स्वेच्छयाभूपपूजाम् ॥१॥
धर्मस्थोधर्मनाशं दशमभवनगतः पापबुद्धिं ददाति
लाभस्थानेऽतिलाभं भवति सुयुवतीवस्तुलक्ष्म्यादिभोगम्।
रूपाढ्यं द्वादशस्थः सुखमतितरां नेत्ररोगंच राहुः ॥२॥

(अर्थ)

जब राहु लग्न में हो तो बहुत दुःख देता है। जब धन स्थान में हो तो धन का नाश करता है। जब तीसरे स्थान में हो तो राजा के यहां

आदर होता है। चतुर्थ स्थान में हो तो भ्राता और मित्र आदि की हानि होती है। पञ्चम स्थान में हो तो सन्तान का नाश करता है। छठे स्थान में हो तो शत्रु का नाश होता है। सप्तम स्थान में हो तो स्त्री का नाश करता है। अष्टम स्थान मे हो तो राजा से आदर होता है। धर्म स्थान में हो तो धर्म का नाश करता है। दशम स्थान में हो तो पाप बुद्धि होती है। लाभ स्थान मे हो तो बहुत लाभ होता है तथा स्त्री, लक्ष्मी आदि का भोग मिलता है। व्यय स्थान में हो तो मनुष्य रुपवान् होता है और उसको अत्यन्त सुख मिलता है परन्तु नेत्र रोग होता है॥

राहुकेतुफलविचारणे रीतिः

यद्यद्भावगतौवापि यद्यद्भावेशसंयुतौ।
तत्तत्फलानि प्रबलौ प्रदिशेतां तमोग्रहौ॥

(अर्थ)

राहु और केतु जिस स्थान में हों अथवा जिस भाव के स्वामी के साथ बैठे हों उन स्थानों के फलो को वृद्धि करते हैं॥

राहु केत्वोः किञ्चिच्छुभफलम्

राहु र्दुष्टः परं किञ्चि दुदास्ते मित्रसद्मनि।
कन्यामिथुनयोः किञ्चिद्विधत्ते शुभमप्ययम्॥

(अर्थ)

राहु दुष्ट फल को देता है परन्तु जब मित्र के घर मे हो तो उसका खराब फल कुछ कम हो जाता है। कन्या तथा मिथुन में स्थित होने से कुछ शुभ फल भी देता है॥

तन्वादिस्थरव्यादीना फलानि.

(१) सूर्यस्य.

तनौ रविः शिरोरोगं बन्धूनांच विरोधताम्।
द्वितीये धनहानिं च तृतीये मित्रवर्द्धनम्॥१॥

धनलाभं सुखे सौख्यं शत्रुभिश्च समागमम् ।
पञ्चमे पुत्रलाभंच कार्यसिद्धिंच सन्मतिम् ॥२॥
षष्ठे धनंजयं कुर्यात्सप्तमे स्त्रीविरोधनत् ।
अष्टमे व्याधिहानीच नवमे मित्रबन्धनम् ॥३॥
भाग्यहानिंच दशमे धनलाभं सुखं जयम् ।
एकादशे धनानांच सिद्धिं मित्रसमागमम् ॥४॥
द्वादशे धनहानिंच जाड्यं कुक्षिरुजं तथा ।

(२) चन्द्रस्य.

चन्द्रे लग्नेच कलहं द्वितीये धनयोजनम् ।
तृतीये भ्रातृभिर्लाभं धनवस्त्रादिसंग्रहम् ः
चतुर्थे धनवस्त्रादि वाहनादिसुसंयुतम् ॥ १ ॥
तीक्ष्णे (५) धनी सुतयुतः परिपूर्णसम्पत्
षष्ठेतु रोगसहितः कुमतिश्च कामे ।
विद्याधनक्षितिसुखादि समन्वितश्च
मृत्यौ च मृत्युविषयः खलु कुक्षिरोगी ॥२॥
स्त्रीस्वर्णदासायति रेव धर्मे
माने सुचारित्रगुणो धनी च ।
लाभेतु चैतत्सकलं व्ययेतु
धनस्य रिष्फं कुरुते शशी तु ॥३॥

(३) भौमस्य.

कुजे लग्ने तु चापल्यात्क्षतं स्वे धननाशनम् ।
विक्रमे भ्रातृमरणं धनलाभ सुखं यशः ॥१॥
चतुर्थे बन्धुमरणं शत्रुवृद्धिर्धनव्ययम् ।
पञ्चमे पुत्रहानिं च धनायतिनुतौ यशः ॥२॥
षष्ठे रिपुसमृद्धेश्च जयं बन्धुसमागमम् ॥
अर्थवृद्धिं स्त्रियां दारमरणं नीचसेवनम् ।
नीचस्त्रीसङ्गमो मृत्यौ धननाशं पराभवम् ॥३॥

पराभवमनर्थं च धर्मे पापरुचिक्रिया ।
धनव्ययं च दशमे धनलाभं कुकर्म च ॥४॥
लाभे धनं सुखं वस्त्रं स्वर्णक्षेत्रादिसंग्रहम् ।
व्यये नेत्ररुजं भ्रातृनाशं च कुरुते कुजः ॥५॥

(४) बुधस्य.

बुध. षष्ठेऽरिवृद्धिं च युद्धे सति पराजयम् ।
मृतौ बन्धुविहीनत्वं बन्धनं व्ययभे व्ययम् ॥
भावेषु फलवृद्धिं च परेषु कुरुते तथा ॥१॥

(५) गुरोः (६) शुक्रस्य.

गुरुशुक्रौ तृतीये तु शत्रुवृद्धिं धनक्षयम् ।
षष्ठे पराजयं व्याधिं मष्टमे बन्धनं तथा ॥१॥
रिःफे चौरहृतस्वंतु नेत्ररोगं पराजयम् ।
सप्तमे च चतुर्थे च सैनापत्यधनायतिः ॥२॥
सर्वसम्पत्समृद्धिं च नवमे राजसम्पदम् ।
पूर्वोक्तफलसंयोगमन्येष्वपि समं भवेत् ॥३॥

(७) शनेः

कुजवद्रविवन्मन्दः ।

(अथ)

(१) सूर्य का फल

जब सूर्य्य लग्न में हो तो सिर में रोग होते हैं और बान्धवों से विरोध होता है । जब दूसरे स्थान में हो तो धन की हानि करता है । तीसरे में मित्रों की वृद्धि और धन का लाभ होता है । सुख स्थान में हो तो दुःख मिलता है और शत्रुओं से समागम होता है । पञ्चम स्थान में पुत्र लाभ होता है, कार्य्य की सिद्धि होती है और सुबुद्धि होती है । छठे स्थान में धन का लाभ होता है । सप्तम में स्त्री से विरोध होता है । अष्टम स्थान में व्याधि

और हानि होते हैं। नवम स्थान में मित्र का बन्धन होता है तथा भाग्यहानि होती है। दशम स्थान में धन का लाभ, सुख और जय होते हैं। एकादश स्थान में धन की प्राप्ति होती है और मित्र से सङ्गम होता है। द्वादश स्थान में धन की हानि, मूर्खता और कुक्षि रोग होते हैं॥

(२) चन्द्रमा का फल

जब चन्द्रमा लग्न में हो तो झगडा होता है। दूसरे स्थान में हो तो धन इकट्ठा होता है। तीसरे स्थान में हो तो भाइयों से लाभ होता है तथा धन, वस्त्र आदि का संग्रह भी होता है। चतुर्थ स्थान में हो तो मनुष्य धन, वस्त्र, वाहन आदि से युक्त होता है। पाचवें स्थान में हो तो मनुष्य धनवान्, पुत्रवान् और सम्पत्ति से परिपूर्ण होता है। छठे में हो तो मनुष्य रोगी और कुबुद्धि वाला होता है। सप्तम स्थान में हो तो मनुष्य विद्यावान् तथा धनी होता है, भूमि और सुख से युक्त होता है। अष्टम स्थान में हो तो मृत्यु करता है तथा कुक्षि रोग होता है। धर्म स्थान में हो तो स्त्री, सुवर्ण और दासों से परिपूर्ण होता है। दशम स्थान में हो तो उसका अच्छा चरित्र होता है और वह गुणवान् तथा धनवान् भी होता है। लाभ स्थान में हो तो पूर्वोक्त नवम दशम का फल होता है। व्यय स्थान में हो तो धन का व्यय कराता है॥

(३) मङ्गल का फल

यस्मिन्भवने चन्द्रस्तस्मिन्यदि जायते ग्रहः कश्चित्।
युतिरिति दोषस्तु तदा शुभयुक्तः केचिदिच्छन्ति॥ १॥
यस्मिन्नृक्षे स्थितः खेटस्तदृक्षं युतिसंज्ञकम्।
तस्मिन्विवाहिता कन्या पुंश्चली जायते ध्रुवम्॥२॥

(अर्थ)

जिस घर में चन्द्रमा हो उसी घर में यदि कोई और भी ग्रह हो तो युति दोष होता है। कोई कहते हैं कि शुभ ग्रह का दोष नहीं होता है॥१॥

जिस नक्षत्र में कोई ग्रह हो उसे युति कहते हैं। उसमें विवाह करने से कन्या व्यभिचारिणी होती है॥२॥

उपग्रह

शराष्टदिक्शक्रनगातिधृत्यस्तिथिधृतिश्चप्रकृतेश्च पञ्च ।
उपग्रहाः सूर्यभतोऽब्जताराः शुभानदेशे कुरुवाह्लिकानाम् ॥

(अर्थ)

यदि सूर्यनक्षत्र से चन्द्रनक्षत्र ५।८।१०।१४।७।१६।१५।१८।२०। २२।२३।२४।२५ वां हो तो उपग्रह दोष होता है। यह दोष कुरु तथा वाह्लीक देशों में वर्जित है॥

दग्धयोगदोषः

शशाङ्कसूर्यर्क्षयुतेऽर्भशेषे खं भूयुगाङ्गानिदशेशतिथ्यः ।
नागेन्दवोऽङ्केन्दुमिता नखाश्चेद्भवन्तिचैते दशयोगसंज्ञाः ॥

फलम्.

वाताभ्राग्निमहीपचौरमरणं रुग्वज्र वादाः क्षतिः ॥

(अर्थ)

अश्विनी नक्षत्र से चन्द्र नक्षत्र तक तथा सूर्य नक्षत्र तक गिन कर दोनों को आपस में जोड कर २७ का भाग देने से यदि ०।१।४।६।१०। ११।१५।१८।१६।२० में से कोई अङ्क शेष रहे तो दश योग दोष होता है॥

यदि शून्य शेष रहे तो वायु भय, १ शेष रहे तो मेघ भय, ४ शेष रहे तो अग्नि भय, ६ शेष रहे तो राज भय, १० शेष रहे तो चौर भय, ११ शेष रहे तो मृत्यु भय, १५ शेष रहे तो रोग भय, १८ शेष रहे तो वज्र भय, १६ शेष रहे तो अपयश का भय, २० शेष रहे तो हानि भय होता है॥

मर्मादिवेधाः

मर्मकंटकवेधंच शल्यंछिद्रं यो न जानाति ।
नार्हति विवाहदीक्षा लग्नं दातु स दैवज्ञः ॥१॥
लग्ने पापे मर्मवेध कंटको नवपञ्चके ।
चतुर्थे दशमे शल्यं छिद्रं भवति सप्तमे ॥२॥

मरणं मर्मवेधेस्यात्कंटके च कुलक्षयः ।
शल्येच नृपतेर्भीतिः पुत्रनाशश्च छिद्रके ॥३॥

(अर्थ)

जो ज्योतिषी मर्म, कंटक वेध, शल्य, छिद्र को नहीं जानता है वह विवाह लग्न निश्चय करने के योग्य नहीं है ॥

लग्न में पाप ग्रह हो तो मर्म वेध होता है, ६।५ में पाप ग्रह हो तो कंटक वेध होता है, ४।१० में पाप ग्रह हो तो शल्य वेध होता है, सप्तम में पाप ग्रह हो तो छिद्र वेध होता है ॥

मर्म वेध का फल मृत्यु है, कंटक का फल कुलक्षय है, शल्य में राज भीति होती है, छिद्र में पुत्र नाश होता है ॥

ग्रहणोत्पातभम्

यस्मिन्धिष्ण्येमहोत्पातोग्रहणं वा भवेद्यदि ।
तस्मिन्धिष्ण्ये शुभंकर्म षण्मासं वर्जयेद्बुधः ॥

(अर्थ)

जिस नक्षत्र में महा उत्पात अथवा ग्रहण हुआ हो उस नक्षत्र में छः महीने तक सब शुभ कर्म वर्जित हैं ॥

विवाहे पञ्चशलाकाचक्रम्

विवाहे पञ्चशलाका चक्रम्

पञ्चोर्ध्वाः स्थापयेद्रेखाः पंच तिर्यङ्मुखास्तथा ।
द्वयोश्च कोणयो र्द्वे द्वे चक्रं पञ्चशलाककम् ॥१॥
ईशाने कृत्तिका देया क्रमादन्यानि भानि च ।
ग्रहास्तेषु प्रदातव्या ये च यत्र प्रतिष्ठिताः ॥२॥
एकरेखास्थिति वेधो दिननाथादिभिर्ग्रहैः ।
विवाहे तत्र मासं तु न जीवति कदाचन ॥
खेटे तत्र गते तुरीय चरणा द्योर्वा तृतीयद्वयो. ॥३॥
वधू प्रवेशने दाने वरणे पाणिपीडने ।
वेधः पंचशलाकाख्योऽन्यत्र सप्तशलाककः ॥४॥
रविवेधे च वैधव्यं कुजवेधे कुलक्षयम् ।
बुधवेधे भवेद्वन्ध्या प्रव्रज्या गुरुवेधत ॥
अपुत्रा शुक्रवेधे च सौरे चन्द्रे च दुःखिता ।
परपुरुषता राहो केतोः स्वच्छन्दचारिणी ॥५॥

(अर्थ)

पाच खडी रेखा तथा पाच तिरछी रेखा लिखे । दो दो रेखा कोणों में दे तो पंच शलाका चक्र बनता है । ईशान में कृत्तिका लिखकर अभिजित् सहित सब नक्षत्रों को क्रम से लिखे । जो ग्रह जिस नक्षत्र पर हों उनको लिखे । सूर्य आदि ग्रह जब एक रेखा में हों तो वेध होता है । चौथे चरण का प्रथम चरण के साथ, द्वितीय चरण का तृतीय चरण के साथ वेध होता है । यदि वेध में विवाह करे तो वर कन्या एक महीना भी जीवित नहीं रहते हैं । शुभ ग्रह का वेध हो तो नक्षत्र चरण त्यागना चाहिये । पाप ग्रह का वेध हो तो सम्पूर्ण नक्षत्र वर्जित करना चाहिये । वधू प्रवेश, (कन्या) दान, वरण तथा विवाह में पंच शलाका चक्र का विचार करना चाहिये, अन्यत्र सप्त शलाका चक्र का विचार होता है ॥

सूर्य का वेध हो तो कन्या विधवा होती है। मंगल का वेध हो तो कुल क्षय होता है। बुध के वेध में कन्या वांझ होती है। बृहस्पति के वेध में कन्या प्रव्रज्या ग्रहण करती है। शुक्र के वेध में संतान नहीं होता है। शनि तथा चन्द्रमा के वेध में दुःख होता है। राहु के वेध में कन्या परपुरुष से व्यभिचार करती है। केतु के वेध मे कन्या स्वच्छन्दचारिणी होती है॥

वाणपञ्चकम्

रस गुण शशि नागाब्ध्याढ्य सङ्क्रान्तियातां—
शकमिति रथतष्टाङ्कैर्यदा पञ्चशेषाः।
रुगनल नृप चौरा मृत्यु सञ्ज्ञश्च वाणो
नवहृत शरशेषे शेषकैक्ये स शल्यः॥ १॥
रात्रौ चौररुजौ दिवा नरपतिर्वह्निः सदा सन्ध्ययो
र्मृत्युश्चाथ शनौ नृपो विदि मृति र्भौमेऽग्निचौरौ रवौ।
रोगोऽथ व्रत गेह गोप नृप सेवायानपाणिग्रहे
वर्ज्याश्च क्रमतो बुधै रुगनलक्ष्मापालचौरामृतिः॥२॥

(अर्थ)

सूर्य के गत अंशों को पांच स्थानों में पृथक् पृथक् स्थापित करो। उनमें क्रम से ६।३।१।८।४ का योग करो। योग फल में ९ का भाग दो। जिस स्थान में पांच शेष रहे वहां क्रम से रोग, अग्नि, नृप, चौर, तथा मृत्यु वाण होते हैं। जैसे आदि में पांच शेष रहे तो रोग वाण, द्वितीय में पांच शेष रहे तो अग्नि वाण, तृतीय में पांच शेष रहे तो नृप वाण, चतुर्थ में पाच शेष रहे तो चौर वाण, पंचम स्थान में पांच शेष रहे तो मृत्यु वाण होता है। पाचों स्थानों के शेष अङ्कों को जोड़ कर नौ का भाग देने से यदि पाच शेष रहे तो लोह सहित वाण होता है॥१॥

रात्रि में चौर तथा रोग वाण, दिन में नृप वाण, सर्व काल में अग्नि वाण, दोनों सन्ध्याओं में मृत्यु वाण वर्जित करने चाहियें।

शनिवार को नृप वाण, बुध वार को मृत्यु वाण, मङ्गल को अग्नि तथा चौर वाण, रविवार को रोग वाण वर्जित करने चाहियें।

यज्ञोपवीत में रोग वाण, घर के छावने में अग्नि वाण, राजा की सेवा में नृप वाण, यात्रा में चौर वाण, तथा विवाह में मृत्यु वाण वर्जित करने चाहियें ॥२॥

विवाहलग्ने रेखाः

लत्ता पातो युतिर्वेधो जामित्रं वाणपञ्चकम्।
एकार्गलोपग्रहश्च क्रान्तिसाम्यं तथैव च ॥
दग्धातिथिस्तु विज्ञेया दश दोषा महाबलाः।
एतान्दोषान्परित्यज्य लग्नं संशोधयेद्बुधः ॥

(अर्थ)

(१) लत्ता (२) पात (३) युति (४) वेध (५) जामित्र (६) वाण (७) एकार्गल (८) उपग्रह (९) क्रान्ति साम्य (१०) दग्धा तिथि। यह दस दोष बड़े बलवान् हैं। इनको छोड़ कर विवाह का लग्न ठहराना चाहिये॥ (इनमें से भी प्रथम पांच अवश्य वर्जनीय हैं। दूसरे पांच आवश्यक में ग्रहण करते हैं) (तिथि पत्रों में विवाहलग्नों पर रेखा दी रहती हैं। वे दो प्रकार की होती हैं। एक तो खड़ी (।) जिसका अर्थ शुभ है। दूसरी टेढ़ी (S) जिसका अर्थ अशुभ है। सब रेखाओं का जोड़ मिला कर दस होता है। यह रेखाएं लत्ता आदि दस दोषों को यथाक्रम शुभ अथवा अशुभ सूचित करती हैं)

लत्तादि दोषापवादः

एकार्गलोपग्रह पात लत्ता
जामित्र कर्तंयुर्दयास्त दोषाः।
नश्यन्ति चन्द्रार्कबलोपपन्ने
लग्ने यथार्काभ्युदये तु दोषाः ॥

(अर्थ)

जब सूर्य चन्द्रमा के बल से युक्त लग्न हो तो एकार्गल, उपग्रह, पात, लत्ता, जामित्र, कर्तरी, उदय तथा अस्त दोषों का ऐसा नाश हो जाता है जैसे कि सूर्योदय होने पर अन्धकार का ॥

लग्ने ग्रहाणा शुभाशुभस्थानानि

व्यये शनिः खेऽवनिजस्तृतीये
भृगुस्तनौ चन्द्रखला न शस्ताः ।
लग्नेट् कविग्लौश्च रिपौ मृतौ ग्लौ
र्लग्नेट् शुभाराश्च मदे च सर्वे ॥१॥
त्र्यायाष्टषट्सु रविकेतुतमोऽर्कपुत्रा
स्त्र्यायारिग· क्षितिसुतो द्विगुणायगोऽब्जः ।
सप्तव्ययाष्टरहितौ ज्ञगुरू सितोऽष्ट
त्रिधूनषड्व्ययगृहान्परिहृत्य शस्तः ॥२॥

(अर्थ)

विवाह लग्न से बारहवा शनि, दशम मंगल, तीसरा शुक्र, लग्न में चन्द्रमा तथा पाप ग्रह शुभ नहीं है। लग्नेश, शुक्र तथा चन्द्रमा छठे शुभ नहीं हैं। चन्द्रमा, लग्नेश, शुभ ग्रह तथा मङ्गल अष्टम स्थान में शुभ नहीं हैं। सप्तम स्थान मे कोई ग्रह शुभ नहीं है ॥१॥

३।११।८।६ स्थानोंमें सूर्य, केतु, राहु तथा शनि श्रेष्ठ हैं। ३।११।६ में मंगल, २।३।११ मे चन्द्रमा, ७।१२।८ स्थानों को छोड़ कर शेष स्थानों में बुध तथा वृहस्पति, ८।३।७।६।१२ स्थानों को छोड कर शेष स्थानों में शुक्र शुभ हैं ॥२॥

दोष परिहारः

पापौ कर्तरिकारकौ रिपुगृहे नीचास्तगौ कर्तरी
दोषो नैव सितेऽरिनीचगृहगे तत्पष्ठदोषोऽपिन ।

भौमेऽस्ते रिपुनीचगे नहि भवेद् भौमोऽष्टमो दोषकृ
न्नीचे नीचनवांशके शशिनि रि. फाष्टारि दोषोऽपिन ॥१॥
अब्दायनर्तुतिथिमासभपक्षदग्ध
तिथ्यन्धकाणवधिराङ्गमुखाश्च दोषाः ।
नश्यन्ति विद्गुरुसितेष्विह केन्द्रकोणे
तद्वच्च पापविधुयुक्तनवांशदोषः ॥२॥
केन्द्रे कोणे जीव आये रवौ वा
लग्ने चन्द्रे वापि वर्गोत्तमे वा ।
सर्वे दोषा नाश मायान्ति चन्द्रे
लाभे तद्वद् दुर्मुहूर्तांशदोषाः ॥३॥
त्रिकोणे केन्द्रे वा मदनरहिते दोषशतकं
हरेत्सौम्यः शुक्रो द्विगुणमपि लक्षं सुरगुरुः ।
भवे दाये केन्द्रेऽङ्गप उत लवेशो यदि तदा
समूहं दोषाणां दहन इव तूलं शमयति ॥४॥

(अर्थ)

कर्त्तरी योग कारक क्रूर ग्रह अपने शत्रु राशि वा नीच राशि अथवा अस्त के हों तो कर्त्तरी का दोष नहीं होता हैं। यदि शुक्र शत्रु राशि का अथवा नीच का होकर छठे घर में हो तो छठे शुक्र का दोष नहीं। मंगल अस्त का अथवा शत्रु राशि का अथवा नीच राशि का हो तो अष्टम मंगल का दोष नहीं। चन्द्रमा नीच का अथवा नीच नवांशक का हो तो ६।८।१२ स्थानों में स्थित होने का दोष नहीं ॥१॥

यदि बुध बृहस्पति शुक्र केन्द्र अथवा त्रिकोण में हों तो वर्ष, अयन, ऋतु, मास, नक्षत्र, पक्ष, दग्ध तिथि, अन्ध, काण, वधिर आदि लग्न दोषों का तथा पापग्रह युक्त चन्द्रमा का अथवा पाप युक्त नवांश का दोष भी नाश हो जाता है ॥२॥

केन्द्र (सप्तम स्थान को छोड कर) अथवा त्रिकोण में वृहस्पति हो अथवा लाभ स्थान में सूर्य हो अथवा चन्द्रमा वर्गोत्तम होकर लग्न में हो (अथवा लग्न से चन्द्रमा उपचय अर्थात् ३।६।१०।११ स्थानों में हो) तो सव दोषों का नाश हो जाता है, दुष्ट मुहूर्त निषिद्ध नवांशों का दोष भी नष्ट हो जाता है ॥३॥

यदि सप्तम स्थान को छोड़ कर केन्द्र अथवा त्रिकोण में वुध हो तो १०० दोषों का नाश करता है। यदि शुक्र हो तो २०० दोषों का नाश करता है। यदि वृहस्पति हो तो एक लाख दोषों को शान्त करता है। लग्नेश अथवा लग्न नवांशेश ११।१।४।१० स्थानों में हो तो दोषों के समूह को ऐसा जलाता है जैसा कि अग्नि रुई को ॥४॥

विंशोपकाः

द्वौ द्वौ ज्ञभृग्वोः पञ्चेन्दौ रवौ सार्धत्रयो गुरौ ।
रामा मन्दागुकेत्वारे सार्धैकैकं विंशोपकाः ॥

(अर्थ)

पूर्वोक्त शुभ स्थानों में यदि वुध शुक्र हों तो २।२ विंशोपक वल पाते हैं। चन्द्रमा ५ वल पाता है। सूर्य ३॥ विश्वा वल पाता है। वृहस्पति ३ विश्वा वल पाता है। शनि, राहु, केतु, मंगल प्रत्येक १॥, १॥ विंशोपक वल पाते हैं ॥

दश विंशोपकाधिक लग्नं शुभम्

लग्नं शुभं विवाहे स्याद्दशविंशोपकाधिकम् ॥

(अर्थ)

विवाह में १० विश्वा से अधिक लग्न शुभ होता है ॥

षट् धिष्ण्यानि.

जन्मभं दशमं कर्म सङ्घातर्क्षंच षोडशम् ।
अष्टादशं सामुदायं त्रयोविंशद्विनाशनम् ।
मानसं पञ्चविंशर्क्षं नाचरेच्छुभकर्मसु ॥

एतेषु षट्सु पापग्रहाधिष्ठितेषु पीडा भवेत् ।
तच्छान्त्यै दानजपहोमादिकं कार्यम् ॥

(अर्थ)

(१) जन्म नक्षत्र, (२) जन्म नक्षत्र से दसवा कर्म नक्षत्र, (३) सोलहवां संघात, (४) अठारहवां सामुदाय, (५) तेईसवा विनाश, (६) पच्चीसवां मानस नक्षत्र कहलाते हैं। शुभ कर्मों में यह ६ नक्षत्र वर्जित हैं॥ वैनाशिक नक्षत्र विशेषतः वर्जित है॥ कोई कहते हैं कि बाइसवां वैनाशिक है॥

(यदि पूर्वोक्त छः नक्षत्रों में कोई पाप ग्रह बैठा हो तो उसकी शान्ति के निमित्त दान, जप, होम आदि करने चाहिये)

वर्षाधिक्य विषये.

रवीज्यचन्द्रशुद्धिश्च दशवर्षाणि कारयेत् ।
अत ऊर्ध्वं रजस्कन्या तस्माद्दोषो नविद्यते ॥१॥
दशवर्षव्यतिक्रान्ता कन्या शुद्धिविवर्जिता ।
तस्यास्तारेन्दुलग्नाना शुद्धौ पाणिग्रहो मतः ॥२॥
सर्वत्रापि शुभं दद्याद् द्वादशाब्दात्परं गुरुः ।
पञ्चषष्ठाब्दयोरेव शुभगोचरता मता ॥३॥

(अर्थ)

कन्या की १० वर्ष की अवस्था होने तक सूर्य, बृहस्पति तथा चन्द्रमा की शुद्धि का विचार करे। तदुपरान्त कन्या रजोवती कहलाती है। इस लिये सूर्य आदि की शुद्धि का विचार न करे ॥१॥

जब कन्या १० वर्ष से अधिक अवस्था वाली हो जावे तो बृहस्पति आदि की शुद्धि का विचार न करे। तारा चन्द्रमा तथा लग्न की शुद्धि में उसका विवाह कर दे ॥२॥

बारह वर्ष की अवस्था के उपरान्त बृहस्पति सब स्थानों में शुभ है। शुभ गोचर का विचार केवल पांचवें अथवा छठे वर्ष में होता है ॥३॥

शनिरिक्ताफलम्

शनैश्चरदिने प्राप्ते यदि रिक्तातिथिर्भवेत् ।
तस्मिन्विवाहिता कन्या पतिसम्पत्तिवर्द्धिनी ॥

(अर्थ)

यदि शनि वार तथा रिक्ता तिथि के दिन कन्या का विवाह किया जावे तो पति की सम्पत्ति की वृद्धि होती है ॥

मघादिपादा वर्ज्याः

मघायाः प्रथमे पादे मूलस्य प्रथमे तथा ।
रेवत्याश्च चतुर्थांशे विवाह प्राणनाशनः ॥

(अर्थ)

मघा के प्रथम चरण में, मूल के प्रथम चरण में, रेवती के चौथे चरण में विवाह करना प्राणों का नाश करता है ॥

पुष्यनक्षत्र विवाहे निन्दितम्

कीर्तितो मुनिभिः सर्वैः पुष्यः सर्वार्थसाधकः ।
इति सत्यपि चोद्वाहे निन्दितः सर्वदा बुधैः ॥

(अर्थ)

यद्यपि मुनि लोगों ने पुष्य नक्षत्र की बड़ी प्रशंसा की है और कहा है कि यह नक्षत्र सब कामों को सिद्ध करने वाला है तथापि विवाह में पुष्य नक्षत्र वर्जित है ॥

विवाहात्पूर्वं दलन कण्डनादि दिनम्

विधो र्बल मवेक्ष्य वा दलनकण्डनं वारकं
गृहाङ्गणविभूषणा न्यथ च वेदिकामण्डपान् ।
विवाहविहितोडुभि र्विरचयेत्तथोद्वाहतो
न पूर्व मिदमाचरेत्त्रिनवषण्मिते वासरे ॥

(अर्थ)

चन्द्रमा का बल देख कर विवाहोक्त नक्षत्रों में कूटना, पीसना, लीपना,

पोतना, चित्रकारी, मंडप आदि बनाना चाहिये। परन्तु विवाह से पूर्व ३।६।६ वें दिन में आरंभ न करे॥

विवाहानन्तरं प्रथमाब्दे वधूनिवासः

उद्वाहात्प्रथमे ज्येष्ठे यदि पत्युर्गृहे वसेत्।
पत्युर्ज्येष्ठं तदा हन्ति पौषेतु श्वशुरं तथा॥१॥
श्वश्रूं साषाढमासेतु अधिमासे स्वकं पतिम्।
आत्मानं तु क्षये मासि तातं तातगृहे मधौ॥२॥

(अर्थ)

यदि विवाह के उपरान्त कन्या पहिले जेठ के महीने में पति के घर में रहे तो पति के जेठे भाई की मृत्यु होती है। पौष में ससुर की मृत्यु होती है। आषाढ़ में सास की मृत्यु होती है। अधि मास में उसके पति की मृत्यु होती है। क्षय मास में उसकी अपनी मृत्यु होती है। चैत के महीने में यदि अपने पिता के घर रहे तो पिता की मृत्यु होती है॥

(५) वधूप्रवेश द्विरागमन प्रकरणम्

वधू प्रवेशः

समाद्विपञ्चाङ्कदिने विवाहा
द्वधूप्रवेशोऽष्टिदिनान्तराले।
शुभः परस्ताद्विषमाब्दमास
दिनेऽक्षवर्षात्परतो यथेष्टम्॥१॥
ध्रुव क्षिप्र मृदु श्रोत्र वसु मूल मघानिले।
वधूप्रवेशः सन्नेष्टो रिक्तारार्के बुधे परैः॥२॥

(अर्थ)

विवाह से १६ दिन के भीतर सम दिनों में अथवा ७।५।६ वें दिनों में वधू प्रवेश शुभ है। यदि १६ दिन के भीतर न हो सके तो विषम वर्ष, विषम मास, विषम दिनों में शुभ है। यदि पाच वर्ष से अधिक हो जावें तो जब चाहे तब करे॥१॥

ध्रुव, क्षिप्र, मृदु, श्रवण, धनिष्ठा, मूल, मघा, स्वाती नक्षत्रों में, रिक्ता तिथि, रवि भौम वारों को छोड़ कर शेष तिथि वारों में वधू प्रवेश शुभ है। कोई आचार्य कहते हैं कि बुध वार भी वर्जित है ॥२॥

द्विरागमनम्

चरेद्थौजहायने घटालिमेषगे रवौ
रवीज्यशुद्धियोगतः शुभग्रहस्य वासरे।
नृयुग्ममीनकन्यका तुलावृषे विलग्नके
द्विरागमं लघुध्रुवे चरेऽस्रपे मृदूडुनि ॥

(अर्थ)

विषम वर्ष (१।३।५) में, ११।१।८ राशि के सूर्य में, सूर्य, तथा बृहस्पति की शुद्धि मिलने पर, शुभ ग्रहों के वार में, ३।१२।६।७।२ लग्नों में, लघु, ध्रुव, चर, मूल, तथा मृदु नक्षत्रों मे द्विरागमन करना श्रेष्ठ है ॥

शुक्र विचारः

दैत्येज्योह्यभिमुखदक्षिणे यदिस्याद्
गच्छेयुर्न हि शिशुगर्भिणीनवोढाः।
बालश्चेद्व्रजति विपद्यते नवोढा
चेद्वन्ध्या भवति च गर्भिणीत्वगर्भा ॥१॥

पित्र्येगृहेचेत्कुचपुष्पसम्भव स्तदानदोषःप्रतिशुक्र सम्भवः।
भृग्वङ्गिरोवत्सवसिष्ठकश्यपात्रीणांभरद्वाजमुनेः कुले तथा ॥२॥

उदेति यस्यां दिशि यत्र याति
गोलभ्रमाद्वाथ ककुब्भसंस्थे।
त्रिधोच्यते सन्मुख एव शुक्रो
यत्रोदितस्तां तु दिशं न यायात् ॥३॥

अस्तं गते गुरौ शुक्रे सिंहस्थे वा बृहस्पतौ।
दीपोत्सववलेनैव कन्या भर्तृगृहं व्रजेत् ॥४॥

उपचयगते जीवे भृगौ केन्द्रमुपागते ।
शुद्धे लग्ने शुभाक्रान्ते गन्तव्यं भर्तृमन्दिरे ॥५॥
पौष्णादि वह्निभावङ्घ्रिं यावत्तिष्ठति चन्द्रमाः ।
तावच्छुक्रो भवेदन्धः सम्मुखे दक्षिणे हितः ॥६॥

(अर्थ)

यदि शुक्र सन्मुख तथा दक्षिण में हो तो बालक, गर्भवती स्त्री तथा नूतन विवाहिता स्त्री यात्रा न करे । यदि बालक जावे तो विपत्ति पड़े, नूतन विवाहिता स्त्री जावे तो वांझ हो, गर्भवती स्त्री जावे तो उसका गर्भ-पात हो ॥१॥

जो पिता के घर में कुच निकल आवे तथा रजोदर्शन होने लगे तो सन्मुख शुक्र का दोष नहीं है । भृगु, अंगिरा, वत्स, वसिष्ठ, कश्यप, अत्रि भरद्वाज गोत्र वालों को सन्मुख शुक्र का दोष नहीं है ॥ २ ॥

सन्मुख शुक्र तीन प्रकार का होता है (१) जिस दिशा में शुक्र का उदय हो (२) उत्तर दक्षिण गोल भ्रमण से जिस दिशा में शुक्र जावे (३) अथवा कृत्तिका आदि नक्षत्रों के वश से जिस दिशा में हो । पूर्वोक्त दिशाओं को जाने वाले को शुक्र सन्मुख होगा । जिस दिशा में उदय हो उस दिशा को यात्रा न करे ॥ ३ ॥

जब बृहस्पति अथवा शुक्र अस्त हो गये हों अथवा सिंहस्थ बृहस्पति हो (कन्या का रजोदर्शन पिता के घर में होने लगा हो) अच्छा मुहूर्त न मिले तो दीपावली के दिन कन्या पति के घर को जावे ॥४॥

बृहस्पति उपचय में हो, शुक्र केन्द्र में हो, लग्न शुभ हो तथा शुभ ग्रह से युक्त हो तब स्त्री पति के घरको यात्रा करे ॥५॥

जब चन्द्रमा रेवती से लेकर कृत्तिका के प्रथम चरण के बीच में रहता है तब शुक्र अन्धा हो जाता है । इसमें सन्मुख अथवा दक्षिण शुक्र का दोष नहीं है ॥ ६ ॥

श्रीदेवीदत्तज्योतिर्वित्संगृहीतानुवादिते सुगमज्योतिषे संस्काराध्यायः पञ्चमः ॥

सुगमज्योतिषम् ।

मुहूर्ताध्यायः षष्ठः

—:०:—

(१) साधारण मुहूर्त प्रकरणम्

यत्र नोक्ता तिथिस्तत्र ग्राह्या रिक्तामभां विना ।
वारोऽपि यत्र न प्रोक्तस्तत्रार्कार्किकुजान्विना ॥१॥

चर मृदु क्षिप्र ध्रुव मूल विशाखा मघासु सकुजे शुभवारे भूकर्षणं हितम् ॥२॥

सूर्यत्यक्तनक्षत्रात् त्र्यष्टनवाष्टसु अशुभं शुभमशुभं शुभ मिति हल चक्रम् ॥३॥

अत्रैव नक्षत्रे शनिभौमभिन्नवारे बीजवापः सस्यारोपणं धान्यच्छेदश्च ॥४॥

धान्यानां मर्दनं ज्येष्ठा मूल मघा श्रवण रेवती रोहिण्य नुराधा फल्गुनी द्वये शुभम् ॥५॥

क्षिप्र ध्रुव चर मृदु मूलेषु ज्ञगुरुशुक्रेषु चरभिन्नलग्ने धान्य संग्रहः शुभः ॥६॥

नवान्नं स्याच्चरक्षिप्र मृदुभे सत्तनौ शुभम् ।
विना नन्दा विषघटी मधुपौषार्किभूमिजान् ॥७॥

वस्त्र भूषण विधि ध्रुवाश्विनी
हस्तपञ्चक (हस्तात्पञ्च) पुनर्वसुद्वये ।
पौष्णवासवभयोश्च सत्तिथौ
मन्द भौम रवि वासरान्विना ॥८॥

अनुक्तेऽपीष्टं वस्त्रं विप्राज्ञोत्सवलब्धिषु ॥९॥

सूचीकर्मा नुराधाश्वि चित्रा मृग पुनर्वसौ ।
वस्त्रं क्षाल्यं धारणोक्ते काले बुधदिनं विना ॥१०॥

भोजनं भाजने रौप्य स्वर्ण कांस्यादि निर्मिते ।
कुर्यादमृतयोगेषु चर क्षिप्र मृदु ध्रुवै. ॥११॥
स्याद्भूषणानां घटनं चर क्षिप्र मृदु ध्रुवैः ।
शुभ वारे रत्नवतां मिश्रभेऽपि रवौ कुजे ॥१२॥
सेवा कार्या क्षिप्र मैत्र ध्रुवैर्ज्ञेज्यार्क भार्गवे ।
मन्देऽपि चेत्सेवकर्क्षं स्वामिभान्न द्वितीयकम् ॥१३॥
राज्ञां विलोकनं क्षिप्र श्रुतिद्वयमृदुध्रुवे ।
विपणिः स्यान्मृदु क्षिप्र ध्रुवै रिक्ताकुजान्विना ॥१४॥
क्रयः कार्योऽश्विनी स्वाती श्रवश्चित्राशतान्त्यभे ।
विक्रयो भरणी पूर्वात्रयाश्लेषासु मिश्रभे ॥१५॥
नाना पशु*क्रिया हस्त पुष्यार्द्रामृगमिश्रभे ।
पुनर्वसौ धनिष्ठाश्वि पूर्वा ज्येष्ठा शतान्त्यभे ॥१६॥
त्यक्त्वाभौमेन्दुशनीन् श्रुति चित्रा ध्रुवाणि च ।
अमारिक्ताष्टमीश्चापि गति*क्रय मुखाः शुभाः ॥१७॥
द्रव्यं लघुचरे योज्य वृद्ध्यर्थ चरलग्नके ।
ऋणं भौमे न गृह्णीयाद् वृद्धियोगेऽर्कसंक्रमे
धनिष्ठापञ्चके हस्त द्विपुष्कर त्रिपुष्करे ॥१८॥
भौमादिषु ऋणच्छेदं कुर्याच्च धन संग्रहम् ।
बुधे धनं न प्रदेयं संग्रहस्तु बुधे शुभः ॥१९॥
वारे गृह्य मृणं तु संक्रमदिने वृद्धौ करेऽर्कह्निय
त्तद्वंशेतु भवेद्दणं नच बुधे देयं कदाचिद्धनम् ॥२०॥
(शन्यर्कारैस्त्रिपादर्क्षे—वि. उफा. पूभा. पुन. कृ. उषा.—
भद्रा तिथ्यां (२।७।१२) त्रि पुष्करः ।
मृग चित्रा धनिष्ठासु तत्तिथ्याहि द्वि पुष्कर. ॥) ॥२१॥

मिश्रक्रूरेषु तीक्ष्णेषु स्वात्यां द्रव्यं न लभ्यते ।
दत्तं प्रयुक्तं निक्षिप्तं नष्टं चेत्याह नारदः ॥२२॥
जलाशयानां खननं मघा पुष्य ध्रुवे मृगे ।
पूर्वाषाढानुराधान्त्य धनिष्ठाशतहस्तभे ॥
जलराशिगते चन्द्रे लग्नस्थे च बुधे गुरौ ॥२३॥
क्षौरं चौलोक्त नक्षत्र वारादिषु शुभं जगु. ।
श्मश्रुकर्म भवेन्नैव नवमे दिवसे क्वचित् ॥२४॥
क्षौरं मृते रतं दर्शे वर्जयेच्च जिजीविषुः ।
क्षौरं नकुर्युरभ्यक्त भुक्त स्नात विभूषिताः ॥२५॥
प्रयाण समरारम्भे न रात्रौ नच सन्ध्ययोः ।
श्राद्धाह प्रतिपद्रिक्ता व्रताह्नि च न वैधृतौ ॥२६॥
प्रशस्तं जन्म नक्षत्र सर्वकर्मसु शोभनम् ।
क्षौर प्रयाण भैषज्य विवादेषु न शोभनम् ॥२७॥
षष्ठीममां पूर्णिमां च चतुर्दशींतथाष्टमीम् ।
तैलाभ्यङ्गे मैथुने च वर्जयेत्क्षौरकर्मणि ॥२८॥
क्षौरं नैमित्तिकं कार्यं निषेधे सत्यपि क्वचित् ।
यज्ञे मृतौ बन्धमोक्षे नृपविप्राज्ञयापि च ॥२९॥
राजकार्यनियुक्तानां नराणां रूपजीविनाम् ।
श्मश्रुलोमनखच्छेदे नास्ति कालविशोधनम् ॥३०॥
प्राग्वयस्कैः सपितृकै नंकार्यं मुण्डनं सदा ।
मुण्डनस्य निषेधेऽपि कर्तनं तु विधीयते ॥३१॥
उदङ्मुखः प्राङ्मुखोवा वपनं कारयेत्सुधीः ॥
मुण्डनं पिण्डदानं च प्रेतकर्म च सर्वशः ।
न जीवपितृकः कुर्याद्गुर्विणीपतिरेव च ॥३२॥

क्षिप्र ध्रुवान्त्य चर मैत्र मघासु शस्तं
स्याच्छान्तिकं सह च मङ्गलपौष्टिकाभ्याम् ।
खेऽर्के विधौ सुखगते तनुगे गुरौ नो
मौढ्यादिदुष्टसमये शुभदं निमित्ते ॥३३॥
सूर्यभात्त्रित्रिभे चान्द्रे सूर्यविच्छुक्रपङ्गवः ।
चन्द्रारेज्यागुशिखिनो नेष्टा होमाहुतिः खले ॥३४॥
सैका तिथिर्वारयुता कृताप्ता
शेषे गुणेऽभ्रे भुवि वह्निवासः ।
सौख्याय होमे शशियुग्मशेषे
प्राणार्थनाशो दिवि भूतले च ॥३५॥
ग्रहणोद्वाह गण्डान्ते तथा दुर्गोत्सवेऽपि च ।
तदाग्निचक्रं नालोक्यं ग्रहशान्तौ विचारयेत् ॥३६॥
व्रतबन्धे विवाहे च नवरात्रे च नित्यके ।
कुलदेवार्चने धीमान्नो कुर्यादग्निचिन्तनम् ॥३७॥
विवाह चूडा व्रतबन्ध गोचरे उत्पात शान्ति ग्रहणे युगादौ ।
दुर्गाविधाने सततंप्रसूतौ नैवाग्नि चक्रं परिशोधनीयम् ॥३८॥
विवाहे व्रतबन्धे च यजने मधुसूदने ।
दुर्गाया पुत्रजन्मादौ अग्निचक्रं न दृश्यते ॥३९॥
दुर्गभङ्गे गृहे वापि विवादे शत्रु विग्रहे ।
शान्तिकेच नृपक्रोधे चक्रं तत्र निरीक्षयेत् ॥४०॥
व्यन्त्यादिति ध्रुव मघानिलसार्पधिष्ण्ये
रिक्ते तिथौ चरतनौ विकवीन्दुवारे ।
स्नानं रुजा विरहितस्य जनस्य शस्तं
हीने विधौ सखलगैर्भवकेन्द्रकोणे ॥४१॥

व्ययाष्टशुद्धोपचये लग्नगे शुभदृग्युते ।
चन्द्रे त्रिषड्दशायस्थे सर्वारम्भः प्रसिद्ध्यति ॥४२॥
रविवारः षष्ठ्याद्यामाश्च रदधावने (वर्ज्याः) ।
पूर्णिमा दर्श संक्रांति चतुर्दश्यष्टमीषु च ।
नरश्चाण्डालयोनौ स्यात्तैलस्त्री मांस सेवनात् ॥४३॥
रविवारश्च तैलाभ्यङ्गे निषिद्धः ॥
सप्तम्यां न स्पृशेत्तैलम् ॥४४॥
दीक्षा कालः । ग्रहणे च महातीर्थे नास्ति कालस्य निर्णयः ॥
पुरश्चरण कालः । ग्रहणे च महातीर्थे न काल मवधारयेत् ॥४५॥
रवि संक्रान्ति वारेषु ग्रहणेषु शशिक्षये ।
व्रतेषु चैव षष्ठीषु न स्नाया दुष्ण वारिणा ॥४६॥
स्नाने चाभ्यञ्जने चैव दन्तधावन मैथुने ।
तिथिस्तात्कालिकी ग्राह्या तथा मरणजन्मनो ॥४७॥
नन्दातिथिष्वभ्यङ्गो वर्ज्यः । रिक्तासु क्षौरं वर्ज्यम् ।
जयासु मांसं वर्ज्यम् । पूर्णासु स्त्री वर्ज्या ।
रविवारेऽभ्यङ्गो भौमवारे क्षौरं बुधे योषिच्च वर्ज्या ॥४८॥
चित्रा हस्त श्रवणेषु तैलं वर्ज्यम् । विशाखा प्रतिपत्सु
क्षौरं वर्ज्यम् । मघा कृत्तिका त्र्युत्तरासु स्त्री न सेव्या ॥४९॥
मसूरं द्वादश्यां वृन्ताकं त्रयोदश्यां वर्ज्यम् ॥५०॥

(अथ)

इस साधारण मुहूर्त प्रकरण में जहा तिथि न कही हो वहा रिक्ता तथा अमावास्या को छोड़ कर शेष तिथियां ग्रहण करनी चाहियें । जहां वार न कहा गया हो वहा रविवार, मङ्गलवार, शनिवार को छोड़ कर शेष वारों को ग्रहण करना चाहिये ॥

भूकर्षण (हलजोतना)

चर, मृदु, क्षिप्र, ध्रुव, मूल, विशाखा, मघा नक्षत्रों में, मंगल तथा शुभवार में शुभ है ॥

हलचक्र

जिस नक्षत्र को सूर्य्य छोड़ दे उससे ३ नक्षत्र अशुभ होते हैं, ८ नक्षत्र शुभ होते हैं, ९ नक्षत्र अशुभ होते हैं, ८ नक्षत्र शुभ होते हैं ॥

वीजवोना, धान के पौधे लगाना, तथा धान काटना ।

पूर्वोक्त नक्षत्रों में शनि तथा मंगल छोड़कर शेष वारों में ये काम शुभ हैं ॥

धान्य मर्दन ।

ज्येष्ठा, मूल, मघा, श्रवण, रेवती, रोहिणी, अनुराधा, पूर्वाफल्गुनी, उत्तराफल्गुनी नक्षत्रों में शुभ है ॥

धान्यसग्रह ।

क्षिप्र, ध्रुव, चर, मृदु, मूल नक्षत्रों में, बुध, बृहस्पति, शुक्रवारो में, चर लग्न को छोड़ कर शेष किसी (अर्थात् स्थिर अथवा द्विस्वभाव) लग्नों में शुभ है ॥

नवान्न ।

चर, क्षिप्र, मृदु, नक्षत्रों में, शुभ ग्रह युक्त लग्न में, नन्दा तिथि तथा विष घटी छोडकर, चैत, पौष मासों को छोड़ कर, शनि तथा मंगलवार को छोड़ कर, अन्यत्र शुभ है ॥

वस्त्र अथवा आभूषण पहिनना ।

ध्रुव, अश्विनी, हस्त से ५ नक्षत्र, पुनर्वसु, पुष्य, रेवती धनिष्ठा नक्षत्रो में, अच्छी तिथि में, शनि, मंगल तथा रविवार को छोड़ कर अन्य वारो में शुभ है ।

जब ब्राह्मण की आज्ञा हो अथवा उत्सव में वस्त्र मिले तो अनुक्त तिथि-वार नक्षत्रों में भी शुभ है ॥

सूची कर्म (सीना)

अनुराधा, अश्विनी, चित्रा, मृगशिर, पुनर्वसु नक्षत्रों में शुभ है ॥

कपड़ा धोना

वस्त्र धारण के लिये जो ऊपर समय बतलाया गया है उसी में बुधवार को छोड कर शुभ है ॥

नया वर्तन

सोना, चांदी, कांसा, आदि के बने हुए पात्र में भोजन करना चर, क्षिप्र, मृदु, ध्रुव नक्षत्रो में तथा अमृतयोग में शुभ है ॥

आभूषण बनवाना

चर, क्षिप्र, मृदु, ध्रुव, नक्षत्रों में तथा शुभवार में शुभ है। जब रत्न जटित आभूषण हों तो मिश्र नक्षत्रों में, रविवार अथवा मंगलवार को भी शुभ है ॥

सेवा (नोकरी)

क्षिप्र, अनुराधा, ध्रुव नक्षत्रों में, बुध, बृहस्पति, रवि, शुक्र तथा शनिवारों में शुभ है। सेवक का नक्षत्र स्वामी के नक्षत्र से द्वितीय न हो ॥

राजदर्शन

क्षिप्र, श्रवण, धनिठा, मृदु, ध्रुव नक्षत्रों में शुभ है ॥

दूकान

मृदु, क्षिप्र, ध्रुव नक्षत्रों में, रिक्ता तिथि, तथा मंगलवार को छोड़ कर अन्यत्र शुभ है ॥

क्रय (खरीदना)

अश्विनी, स्वाती, श्रवण, चित्रा, शतभिषा तथा रेवती नक्षत्रो में शुभ है ॥

विक्रय (वेचना)

भरणी, पूर्वाषाढा, पूर्वाफल्गुनी, पूर्वाभद्रपदा, अश्लेषा, मिश्र नक्षत्रों में शुभ है॥

पशुओं का गमन अथवा क्रय विक्रय आदि

हस्त, पुष्य, आर्द्रा, मृगशिर, मिश्र, पुनर्वसु, धनिष्ठा, अश्विनी, तीनों पूर्वा, ज्येष्ठा, शतभिषा, रेवती नक्षत्रों में. मंगल, चन्द्र, शनि वारों को तथा श्रवण, चित्रा, ध्रुव नक्षत्रों को, अमावास्या, रिक्ता, अष्टमी, तिथियों को छोड़कर अन्यत्र शुभ है॥

रुपया जमा करना या सूद में देना

लघु, चर, नक्षत्रों में तथा चर लग्न में शुभ है॥

ऋण लेना

मंगलवार के दिन, वृद्धियोग में, सूर्य्यसंक्रान्ति के दिन, धनिष्ठा आदि ५ नक्षत्रों में, अर्थात् पञ्चकों में, हस्त, द्विपुष्कर तथा त्रिपुष्कर योगों में ऋण नहीं लेना चाहिये। द्विपुष्कर, त्रिपुष्कर योग संज्ञाध्याय (पृष्ठ ४८) में देखने चाहियें॥ मंगलवार के दिन, सूर्य्य संक्रान्ति के दिन, वृद्धियोग में, हस्तनक्षत्र में, रविवार के दिन, ऋण नहीं लेना चाहिये। यदि कोई ले तो उसके वंश में सदा ऋण बना रहता है॥

धन संग्रह तथा ऋणच्छेद (कर्ज बेवाकी)

पूर्वोक्त मंगलवार आदि में करना चाहिये। बुधवार के दिन धन नहीं देना चाहिये परन्तु बुधवार के दिन धन संग्रह शुभ है॥ बुधवार के दिन धन कभी नहीं देना चाहिये॥

रुपया जमाकरना, कर्ज़ देना
अथवा रुपये की चोरी होना

मिश्र, क्रूर, तीक्ष्ण, नक्षत्र, वारों में तथा स्वाती नक्षत्र में दिया हुआ अथवा जमा किया हुआ अथवा खोया हुआ द्रव्य नहीं मिलता है ऐसा नारद जी का वचन है॥

कुआ आदि खोदना।

मघा, पुष्य, ध्रुव, मृगशिर, पूर्वाषाढ़ा, अनुराधा, रेवती, धनिष्ठा, शतभिषा, हस्त नक्षत्रों में, जब चन्द्रमा जलराशि का हो तथा लग्न में जब बुध तथा बृहस्पति हों तो शुभ है॥

क्षौर (हजामत)

जो नक्षत्र वार आदि चूडा कर्म में उक्त हैं उन्हीं में नित्य क्षौर भी शुभ है। नवें दिन हज़ामत नहीं बनवानी चाहिये। जो आदमी जीवित रहना चाहे वह चतुर्दशी के दिन क्षौर, अमावास्या के दिन स्त्री संग वर्जित करे। तेल लगाकर अथवा भोजन के उपरान्त अथवा स्नान करके अथवा भूषण आदि पहिन के क्षौर न करना चाहिये।

यात्रा के समय, युद्ध के आरम्भ मे, रात्रि में, तथा प्रात. सन्ध्या अथवा सायं सन्ध्या के समय, श्राद्ध के दिन, प्रतिपदा तथा रिक्ता तिथि के दिन, व्रत के दिन, वैधृतियोग में क्षौर न करना चाहिये॥

सब कामों में जन्म नक्षत्र श्रेष्ठ है, परन्तु क्षौर, यात्रा, औषधि सेवन, तथा विवाद (बहिस) में जन्म नक्षत्र शुभ नहीं है। षष्ठी, अमावास्या, पौर्णमासी, चतुर्दशी तथा अष्टमी, तैलाभ्यङ्ग, मैथुन, तथा क्षौर कर्म में वर्जित हैं। यदि नैमित्तिक (किसी कार्य्य के वश से) क्षौर करना हो तो निषिद्ध दिन में भी करना चाहिये। जैसे यज्ञ में, पिता आदि की मृत्यु होने पर, बन्धमोक्ष में, राजा अथवा ब्राह्मण की आज्ञा से। जो लोग राजकार्य्य मे लगे हों (सरकारी नोकर हों) तथा जो लोग रूपजीवी हों (भांड, नट आदि) उनके दाढ़ी मोछ बनवाने में अथवा नाखून कटवाने में काल की शुद्धि का विचार नहीं करना चाहिये।

छोटे बच्चों को तथा जीवत्पितृक को मुण्डन नहीं करवाना चाहिये। जहां मुण्डन का निषेध हो वहां कर्तन (कैंची से बाल छटवाना) कराना चाहिये। उत्तर अथवा पूर्व को मुख करके क्षौर कराना चाहिये। जिसका पिता जीवित हो अथवा जिसकी स्त्री गर्भवती हो उसको मुण्डन, पिण्ड-

दान, तथा सब प्रकार के प्रेत कर्म नहीं करने चाहिये। (परन्तु यह वचन माता पिता के विषय में नहीं है) ॥

शान्तिक कर्म

क्षिप्र, ध्रुव, रेवती, चर, अनुराधा, मघा नक्षत्रों में शान्तिक कर्म, मङ्गल, पौष्टिक मुहूर्त शुभ हैं। दशम सूर्य्य हो, सुख स्थान में चन्द्रमा हो, लग्न में बृहस्पति हो तो शुभ है, परन्तु शुक्रास्तादि दुष्ट समय में शुभ नहीं है, यदि निमित्त वश किया जाय तो शुभ है ॥

होमाहुति

सूर्य्य नक्षत्र से चन्द्रमा का नक्षत्र ३, ३ करके गिनना। उसमें क्रम से सूर्य्य, बुध, शुक्र, शनि, चन्द्रमा, मङ्गल, बृहस्पति, राहु, केतु होते हैं। यदि खल ग्रह हो तो होमाहुति शुभ नहीं है ॥

वह्निवास

वर्तमान तिथि में १ जोड़कर तथा वार की संख्या जोड़कर ४ से भाग दे। यदि ३ अथवा शून्य शेष रहे तो वह्निवास भूलोक में होता है, वह होम में सुख देने वाला होता है। यदि १ या २ शेष रहे तो क्रम से स्वर्ग में तथा भूतल में वह्निवास होता है, उसमें प्राण तथा अर्थ का नाश होता है ॥

अग्निचक्र

ग्रहण, विवाह, गण्डान्त, दुर्गोत्सव में अग्नि चक्र का विचार नहीं करना चाहिये, परन्तु ग्रहशान्ति में विचार करना चाहिये ॥१॥

व्रतबन्ध, विवाह, नवरात्र, नित्य कर्म, कुल देवता के पूजन में अग्नि चक्र का विचार नहीं करना चाहिये ॥२॥

विवाह, चूडाकर्म, व्रतबन्ध, गोचर, उत्पात, शान्ति, ग्रहण, युगादि, दुर्गाविधान, तथा जन्म समय में अग्निचक्र का शोधन नहीं करना चाहिये ॥३॥

विवाह, व्रतबन्ध, यज्ञ, विष्णु की पूजा, दुर्गा की पूजा, पुत्र जन्म आदि में अग्नि चक्र का विचार नहीं किया जाता है ॥४॥

दुर्गभङ्ग, गृह, विवाद, शत्रु वैर, शान्ति तथा राजा के क्रोध में, अग्नि चक्र का विचार होता है ॥५॥

रोगनिर्मुक्त स्नान

रेवती, पुनर्वसु, ध्रुव, मघा, स्वाती अश्लेषा, नक्षत्रों को छोड कर, रिक्तातिथि, तथा चर लग्न में, शुक्र तथा चन्द्रवार को छोड़कर, चन्द्रमा जब हीन हो, पाप ग्रह ग्यारहवें स्थान में, केन्द्र, अथवा कोण में हों, तब रोग रहित मनुष्य को स्नान कराना शुभ है ॥

सर्वारम्भ

जब १२,८, उपचय (३।६।११) स्थान शुद्ध हों, लग्न में शुभ ग्रह हों अथवा शुभ ग्रह की दृष्टि हो, ३,६,१०,११ स्थानों में चन्द्रमा हो तो सर्वारम्भ शुभ होता है ॥

दन्तधावन

षष्ठी, प्रतिपदा, अमावास्या, तथा रविवार वर्जित हैं ॥

तेल लगाना, स्त्री सङ्ग तथा मांस भोजन

पौर्णमासी, अमावास्या, संक्रान्ति, चतुर्दशी, अष्टमी के दिन यदि मनुष्य तेल, स्त्री तथा मांस का सेवन करे तो चाण्डाल योनि में उत्पन्न होता है। सप्तमी तथा रविवार भी तैलाभ्यङ्ग में वर्जित हैं ॥

दीक्षा पुरश्चरण

सूर्य चन्द्र ग्रहण में अथवा महातीर्थ में कालाकाल का निर्णय न करना चाहिये ॥

गर्म पानी से स्नान

रविवार, संक्रान्ति, ग्रहण, अमावस्या, व्रत, षष्ठी तिथि, इतने दिन गर्मपानी से स्नान न करना चाहिये ॥

तात्कालिकी तिथि

स्नान, अभ्यञ्जन, दन्तधावन, मैथुन, जन्म, तथा मरण में तात्कालिकी तिथि लेनी चाहिये ॥

वर्जित

नन्दा तिथियों में अभ्यङ्ग (उवटन), रिक्ता तिथियों में क्षौर, जया तिथियों में मांस, पूर्णा तिथियों में स्त्री सेवन वर्जित करना चाहिये।

रविवार को अभ्यङ्ग भौमवार को क्षौर, बुध को स्त्री सेवन वर्जित करना चाहिये।

चित्रा, हस्त, श्रवण नक्षत्रों में तेल, विशाखा तथा प्रतिपदा के दिन क्षौर, मघा, कृत्तिका तीनों उत्तराओं में स्त्री सेवन, द्वादशी तिथि को मसूर की दाल, तथा त्रयोदशी में वृन्ताक (बैंगन) वर्जित हैं॥

रोगोत्पत्तौ नक्षत्रफलम्.

अश्विन्यांरोगोत्पत्तौएकाहंनवदिनानि पंचविंशतिर्दिनानिवा पीडा।

भ. ११।२१ दिनानि. मासंवा. मृत्युर्वा.
कृ. १०।६।२१ ,,
रो. १०।६।७।३ ,,
मृ ५।६।३० ,,
आ १०।३० ,, मृत्युर्वा
पुन ७।६ ,, ,,
पु ७ ,, ,,
अ २०।३०।६ ,, ,,
म ४५।३०।२० ,, ,,
पू १५।३०।६० ,, ,, एकवर्षंवा
उ ७।१५।२७ ,,
ह ८।६।७।१५ ,, मृत्युर्वा
चि ८।१०।११।१५,, ,,
स्वा १० दिनानि. ,, १।१।३।४।५ मासंवा
वि मासं. पक्षः, ८।२० दिनानिवा
अ १०।२८ दिनानि

ज्ये २१ दिनानि. मासं. पक्षः, मृत्युर्वा
मू ६।२०। दिनानि. पक्षः ,,
पू २०।१५ दिनानि ,, २।३।६ मासं वा
उ २०।४५।३० ,,
श्र २५।१०।११।६० ,,
ध १०।१५।३०।१३ ,,
श १२।११ दिनानि
पू १० दिनानि २।३ मासं वा मृत्युर्वा
उ ७।१०।१५।४५ दिनानि
रे. १०।२८ दिनानि

(अर्थ)

जब अश्विनी नक्षत्र में रोग उत्पन्न हो तो एक दिन, नौ दिन अथवा पचीस दिन पीडा होती है इत्यादि चक्रमें स्पष्ट है। अथवा नक्षत्रों के तारों की जितनी संख्या हो (१०५३) उतने ही दिन रोग भी रहता है ॥

रोगोत्पत्तौ मृत्युयोग'

रौद्राहिशक्राम्बुपयाम्यपूर्वा
द्विदैववस्वग्निषु पापवारे।
रिक्ताहरिस्कन्ददिने च रोगे
शीघ्रं भवेद्रोगिजनस्य मृत्युः ॥

(अर्थ)

यदि आर्द्रा, अश्लेषा, ज्येष्ठा, उत्तराषाढा, भरणी, तीनों पूर्वा, विशाखा, धनिष्ठा, कृत्तिका नक्षत्रों में, पापवारों में, रिक्ता, द्वादशी, षष्ठी तिथि के दिन रोग उत्पन्न हो तो रोगी को शीघ्र मृत्यु होती है ॥

(२) वास्तु प्रकरणम्.

गृहारम्भे वेधविचारः

(चतुर्विंशत्यङ्गुलोहस्तश्चतुःकरोदंडः)

जालन्धरे हस्त संख्या पर्वते दंडकाः स्मृताः ।
मध्यदेशे क्रोशसंख्या द्वीपान्तरे तुयोजनम् ॥१॥
आदावुदीच्या विन्यस्य पश्चाद्याम्यां तु विन्यसेत् ।
तद्गृह पीड्यते तत्र पुत्रदारादिनाशनम् ॥२॥
यदाग्नेय्यां भवेन्नीच मुच्चं वायव्यएव च ।
नवेधो जायते तत्र व्यासस्य वचनं यथा ॥३॥
दश दंडविपर्यन्तं वेधयेत् पूर्वनीचकम् ।
उत्तरे द्वादशं याव न्नीचस्थानस्थितस्यतु ॥४॥
उच्चस्थं वापि नीचस्थं सदा याम्यगृहं त्यजेत् ॥५॥
गृहोच्छ्रायाद्द्विगुणिता त्यक्ता भूमिर्वहिः स्थिता ।
अदर्शने नदीपारे दूरेवा समभूमिषु ।
नवेध्यन्ते गृहाः सर्वे यत्रोक्तविदिशिस्थिताः ॥६॥
वीथ्यन्तरे नवेधस्तु नवेधो मार्गमध्यतः ।
भित्त्यन्तरे नदोषः स्यान्न दोषो वृक्षमध्यगे ॥
न दोषो नीचजातेश्च नदोषः फलवृक्षके ॥७॥

(अर्थ)

२४ अङ्गुल का एक हस्त होता है, ४ हस्तों का एक दण्ड होता है ॥ जालन्धर देश में हस्त संख्या, पर्वत में दण्ड संख्या, मध्यदेश में क्रोश संख्या, अन्य द्वीपों में योजन संख्या से वेध होता है ॥१॥

यदि आदि में उत्तर दिशा में घर बन गया हो पीछे दक्षिणदिशा में घर बने तो वह दक्षिण दिशा वाला घर वेध युक्त होता है, पुत्र स्त्री आदि का नाश करने वाला होता है ॥२॥

जब आग्नेय दिशा में नीचा हो, वायव्य दिशा में ऊंचा हो तो वेध नहीं होता है ऐसा व्यास जी का वचन है ॥३॥

पूर्व दिशा में नीच स्थान में स्थित घर का १० दण्ड पर्य्यन्त वेध होता है, उत्तर में नीच स्थान में स्थित घर का १२ दण्ड पर्य्यन्त वेध होता है ॥४॥

दक्षिण की ओर का घर चाहे ऊचा हो चाहे नीचा हो सदा वर्जित करना चाहिये ॥५॥

जब घर की ऊचाई से दुगुनी भूमि बाहर को छूटी हो, अथवा जहां से घर पर दृष्टि न पड़े, अथवा बीच में नदी पड़ जावे, अथवा बहुत दूर हो, अथवा समभूमि हो, अथवा विदिशाओं में घर हो, तो वेध नहीं होता है ॥ ६ ॥

यदि बीच में गली पड जावे तो वेध नहीं होता है, बीच में मार्ग पड़े तो वेध नहीं होता है, बीच में दीवाल पडने से भी वेध नहीं होता है, नीच जाति के घर का वेध नहीं होता है, फलका वृक्ष बीच में हो तब भी दोष नहीं होता है ॥७॥

गृहारम्भः

भौमार्करिक्तामाद्यूने चरोनेऽङ्गे विपञ्चके ।
व्यन्त्याष्टस्थैः शुभैर्गेहारम्भ स्त्र्यायारिगैः खलैः ॥१॥
ध्रुवमृदु वरुण स्वाति वस्वर्क पुष्यै (गृहारम्भं कुर्यात्) ।
गृहेश तत्स्त्री सुख वित्तनाशोऽर्केन्द्वीज्य शुक्रे विबलेऽस्तनीचे ॥२॥
जीवार्क विच्छुक्र शनैश्चरेषु लग्नारि जामित्र सुखत्रिगेषु ।
स्थितिः शतं स्याच्छरदां सितार्को रेज्ये तनुव्यङ्ग सुतेशतेद्वे ॥३॥
लग्नाम्बरायेषु भृगुज्ञभानुभिः केन्द्रे गुरौ वर्ष शतायु रालयम् ।
बन्धौगुरुर्व्योम्नि शशीकुजार्कजौलाभेतदाशीतिसमायुरालयम् ॥४॥
स्वोच्चे शुक्रे लग्नगेवा गुरौ वेश्म गतेऽथवा ।
शनौ स्वोच्चे लाभगेवा लक्ष्म्या युक्तं चिरं गृहम् ॥५॥

पुष्यध्रुवेन्दुहरिसर्पजलैःसजीवैस्तद्वासरेणचकृतंसुतराज्यदं स्यात् ।
द्वीशाश्वितक्षवसुपाशिशिवैःसशुक्रैर्वारेसितस्यचगृहंधनधान्यदंस्यात्
सारैः करेज्यान्त्यमघांबु मूलैःकौजेह्निवेश्माग्निसुतार्तिदं स्यात् ।
सज्ञैः कदास्रार्यमतक्षहस्तैर्ज्ञस्यैववारे सुखपुत्रदं स्यात् ॥७॥
अजैकपादहिर्बुध्न्य शक्रमित्रानिलान्तकैः ।
समन्दैर्मन्दवारे स्याद्रक्षोभूतयुतं गृहम् ॥८॥
गुरु शुक्रार्क चन्द्रेषु स्वोच्चादिवलशालिषु ।
गुर्वर्केन्दुवलं लब्ध्वा गृहारम्भः प्रशस्यते ॥९॥
विवाहोक्तान्महादोषा नृते यामित्रशुद्धितः ।
रिक्ता कुजार्कवारौच चरलग्नं चरांशकम् ।
त्यक्त्वा कुजार्कयोश्चांशं कुर्याद्गेहं शुभाप्तये ॥१०॥
दत्ते दुःखं तृतीयर्क्षं पञ्चमर्क्षं यशःक्षयम् ।
आयुःक्षयं सप्तमर्क्षं कर्तृभाद्गृहभावधि ॥११॥
गृहसंस्थापनं सूर्ये मेषस्थे शुभदं भवेत् ॥
वृषस्थे धनवृद्धिः स्यान्मिथुने मरणं ध्रुवम् ॥१२॥
कर्कटे शुभदं प्रोक्तं सिंहे भृत्यविवर्धनम् ।
कन्या रोगं तुला सौख्यं वृश्चिके धनवर्धनम् ॥१३॥
कार्मुके च महाहानिर्मकरेस्याद्धनागमः ।
कुम्भेतु रत्नलाभः स्यान्मीने सद्मभयावहम् ॥
मीनचापमिथुनाङ्गनागते कारयेन्न गृहमेव भास्करे ॥१४॥
चित्रानुराधा मृग रेवतीषु स्वातौ च पुष्येच तथोत्तरासु ।
ब्राह्मे धनिष्ठा शततारकासु गेहादिकारम्भण मामनन्ति ॥१५॥
चित्रा शतभिषा स्वाती हस्तः पुष्यपुनर्वसू ।
रोहिणी रेवती मूलं श्रवणोत्तरफल्गुनी ॥१६॥

धनिष्ठाचोत्तराषाढा तथा भाद्रोत्तरान्विता ।
अश्विनी मृगशीर्षंच अनुराधा तथैव च ॥१७॥
वास्तुपूजनमेतेषु नक्षत्रेषु करोति यः ।
समाप्नोति नरो लक्ष्मी मिति प्राह पराशरः ॥१८॥
त्र्युत्तरेपिच रोहिण्यां पुष्ये मैत्रे करद्वये ।
धनिष्ठाद्वितये पौष्णे गृहारम्भः प्रशस्यते ॥१९॥
द्व्यङ्गे वा स्थिरभे च सौम्य सहिते लग्ने शुभै र्वीक्षिते—
सिंह विहीन लग्ने ॥२०॥

(अर्थ)

मङ्गलवार, रविवार, रिक्तातिथि, अमावास्या तथा प्रतिपदा को छोड कर, चर लग्न को छोड कर, (बाण) पञ्चक को छोड कर, जब शुभ ग्रह १२,८ स्थानों में नहीं, पाप ग्रह ३,६,११ स्थानों में हों तो गृहारम्भ शुभ है ॥ १ ॥

ध्रुव, मृदु, शतभिषा, स्वाती, धनिष्ठा, हस्त, पुष्य, नक्षत्र शुभ हैं ॥
जब सूर्य्य, चन्द्रमा, बृहस्पति, शुक्र बलहीन हों, अस्तङ्गत हों अथवा नीच के हों तो घर के स्वामी, उसकी स्त्री, सुख तथा धन का नाश होता है ॥ २ ॥

जब बृहस्पति, सूर्य्य, बुध, शुक्र, शनि, १,६,७,४,३ स्थानों में हों तो घर की स्थिति एक सौ बरस की होती है। यदि शुक्र, सूर्य्य, मङ्गल, बृहस्पति, १, ३, ६, ५ स्थानों में हों तो घर की आयु दो सौ बरस की होती है ॥ ३ ॥

जब लग्न, १०,११ स्थानों में शुक्र, बुध तथा सूर्य्य हों, केन्द्र में बृहस्पति हो तो घर की आयु सौ बरस की होती है। जब चतुर्थ स्थान में बृहस्पति हो, दशम स्थान में चन्द्रमा हो, लाभ स्थान में मंगल तथा शनि हो तो घर की आयु ८० वर्ष की होती है ॥ ४ ॥

जब शुक्र उच्च का होकर लग्न में बैठा हो, अथवा बृहस्पति चौथे स्थान में हो, अथवा शनि अपने उच्च का होकर लाभ स्थान में हो, तो घर लक्ष्मी से युक्त तथा चिरस्थायी होता है ॥ ५ ॥

पुष्य, ध्रुव, मृगशिर, श्रवण, अश्लेषा, पूर्वाषाढा नक्षत्रों में बृहस्पति हो तथा बृहस्पति वार भी हो तो पुत्र तथा राज्य की प्राप्ति होती है। विशाखा, अश्विनी, चित्रा, धनिष्ठा, शतभिषा, आर्द्रा, नक्षत्रों में शुक्र हो तथा शुक्र वार भी हो तो घर धन धान्य देने वाला होता है ॥६॥

हस्त, पुष्य, रेवती, मघा, पूर्वाषाढ़ा, मूल नक्षत्रों में मंगल हो तथा मङ्गल वार भी हो तो घर मे अग्नि भय होता है तथा पुत्र को पीडा होती है। रोहिणी, अश्विनी, उत्तरा फल्गुनी, चित्रा, हस्त, नक्षत्रों मे बुध हो तथा बुध वार भी हो तो सुख तथा पुत्र की प्राप्ति होती है ॥७॥

पूर्वा भाद्रपदा, उत्तरा भाद्रपदा, ज्येष्ठा, अनुराधा, स्वाती, भरणी नक्षत्रों में शनि हो तथा उसीका वार भी हो तो घर मे राक्षस तथा भूत होते हैं ॥ ८ ॥

जब बृहस्पति, शुक्र, सूर्य्य तथा चन्द्रमा अपने उच्च स्थान आदि में बलवान् हों, बृहस्पति, सूर्य्य, तथा चन्द्रमा का बल लेकर गृहारम्भ करना चाहिये ॥९॥

यामित्र के विना शेष विवाहोक्त महादोषों को, तथा रिक्तातिथि, रविवार तथा मंगल वार, चर लग्न अथवा चर लग्न का नवांशक, अथवा सूर्य्य तथा मंगल के नवांशक को छोड़ कर गृहारम्भ करना चाहिये ॥१०॥

घर बनाने वाले के नक्षत्र से गृहारम्भ के नक्षत्र तक गिनने से तीसरा नक्षत्र दुःख देता है, पांचवा नक्षत्र यश का नाश करता है, सातवां नक्षत्र आयु का क्षय करता है ॥११॥

जब सूर्य्य मेष का हो तो घर का स्थापन करना शुभ है, जब वृष का हो तो धन की वृद्धि होती है, जब मिथुन का हो तो मृत्यु होती है ॥१२॥

जब कर्क का हो तो शुभ होता है, सिंह का हो तो भृत्यों की वृद्धि होती है, जब कन्या का हो तो रोग होता है, तुला का हो तो सुख होता है, वृश्चिक का हो तो धन की वृद्धि होती है ॥१३॥

धन का हो तो बड़ी हानि होती है, मकर का हो तो धन की प्राप्ति होती है, कुम्भ का हो तो रत्न का लाभ होता है, मीन का हो तो भय होता है ॥

जब सूर्य्य मीन, धन, मिथुन तथा कन्या का हो तो नया घर न बनवाना चाहिये ॥१४॥

चित्रा, अनुराधा, मृगशिर, रेवती, स्वाती, पुष्य, तीनों उत्तरा, रोहिणी, धनिष्ठा, शतभिषा नक्षत्रों मे गृहारम्भ शुभ है ॥१५॥

चित्रा, शतभिषा, स्वाती, हस्त, पुष्य, पुनर्वसु, रोहिणी, रेवती, मूल, श्रवण, उत्तरफल्गुनी, धनिष्ठा, उत्तराषाढ़ा, उत्तराभाद्रपदा, अश्विनी, मृगशिर, अनुराधा नक्षत्रों में जो मनुष्य वास्तु पूजन करता है उसको लक्ष्मी की प्राप्ति होती है ऐसा पाराशर कहते हैं ॥१६।१७।१८॥

तीनों उत्तरा, रोहिणी, पुष्य, अनुराधा, हस्त, चित्रा, धनिष्ठा, शतभिषा, रेवती नक्षत्रों में गृहारम्भ शुभ है ॥१९॥

गृहारम्भ में द्विस्वभाव, अथवा स्थिर लग्न होना चाहिये, जिस में शुभ ग्रह बैठे हों अथवा जिस पर शुभ ग्रहों की दृष्टि हो।

सिंह लग्न वर्जित करना चाहिये ॥२०॥

गृहारम्भे वृषचक्रशुद्धिः

(सूर्यभाद् दिनभ यावद् गणना)

शीर्षे	३	नक्षत्राणि.	फलं	दाहः
अग्रपादे	४	,,	,,	शून्यम्
पृष्ठपादे	४	,,	,,	स्थिरता
पृष्ठे	३	,,	,,	लक्ष्मीप्राप्तिः

दक्षिणकुक्षौ	४	नक्षत्राणि	फलं	लाभः
पुच्छे	३	,,	,,	स्वामिनाशः
वामकुक्षौ	४	,,	,,	दारिद्र्यम्
मुखे	३	,,	,,	पीडा
	२८			

प्रकारान्तरेण

सूर्यभात्	७	अशुभानि
	११	शुभानि
	१०	अशुभानि
	२८	

(अथ)

सूर्य नक्षत्र से दिन नक्षत्र पर्यन्त गिनती करनी चाहिये। फल ऊपर लिखा है॥

गृह प्रवेशः

सौम्यायने ज्येष्ठतपोन्त्यमाधवे
यात्रानिवृत्तौ नृपतेर्नवे गृहे।
स्याद्वेशनं द्वाःस्थमृदुध्रुवोडुभि
र्जन्मर्क्षलग्नोपचयोदये स्थिरे॥१॥

मृदुध्रुवक्षिप्रचरेषु मूलभे
वास्त्वर्चनं भूतबलिश्च कारयेत्।
त्रिकोणकेन्द्रायधनत्रिगैः शुभै
र्लग्नात्त्रिषष्ठायगतैश्च पापकैः॥२॥

षष्ठ्यष्टमीविष्णुदिनानि रिक्तां
विहाय चित्रोत्तररोहिणीश्च।

मृगान्त्यमैत्रे शनिवित्सितेज्ये
निवृत्य गेहं प्रविशेत्प्रयाणात् ॥३॥
स्थिरेऽङ्गेशे शुभे स्थं कोणकेन्द्रत्रिलाभगैः ।
पापैर्लाभत्रिषट्संस्थैः शुद्धे तुर्ये तथाष्टमे ॥४॥
क्रूरग्रहाधिष्ठितविद्धभं च विवर्जनीयं त्रिविधप्रवेशे ॥
कृत्वा शुक्रं पृष्ठतो वामतोऽर्कम् ॥५॥
रन्ध्रात्पुत्राद्धनाद्द्वारात्प चस्वर्के स्थिते क्रमात् ।
पूर्वाशादि मुखं गेहं विशेद्वामो भवेद्यतः ॥६॥

(अर्थ)

उत्तरायण में, ज्येष्ठ, माघ, फाल्गुन, वैशाख के महीनों में, मृदु, ध्रुव, नक्षत्रों में, स्थिर लग्न में, जन्म राशि अथवा जन्म लग्न से उपचय (३।६।१०।११) लग्न हो तो गृहप्रवेश शुभ है ॥१॥

मृदु, ध्रुव, क्षिप्र, चर, मूल, नक्षत्रों में, जब लग्न से त्रिकोण, केन्द्र, लाभ, धन, पराक्रम में शुभ ग्रह हों तथा ३, ६, ११ स्थानों में पाप ग्रह हों तो वास्तु पूजन तथा भूतबलि करना शुभ है ॥२॥

षष्ठी, अष्टमी, द्वादशी, रिक्ता तिथियों को छोड़ कर, चित्रा, तीनों उत्तरा, रोहिणी नक्षत्रों को छोड़ कर, मृगशिर, रेवती, अनुराधा नक्षत्रों में, शनि, बुध, शुक्र, बृहस्पति वारों में, गृहप्रवेश करना चाहिये ॥३॥

जब लग्नेश स्थिर लग्न में हो, धन, कोण, केन्द्र, पराक्रम तथा लाभ स्थानों में शुभ ग्रह हों, ३, ६, ११ स्थानों में पाप ग्रह हों, चतुर्थ तथा अष्टम स्थान शुद्ध हों, ऐसे मुहूर्त में गृह प्रवेश शुभ है ॥४॥

जब क्रूर ग्रह से नक्षत्र विद्ध हो तो तीनों प्रकार का गृह प्रवेश (नया, पुराना, मरम्मत किया हुआ) वर्जित है। शुक्र पृष्ठ में होना चाहिये (पृ. ६८७ देखो) तथा सूर्य बांया होना चाहिये ॥५॥

जब ८,५,२,७, स्थानों से पंचम स्थान में सूर्य हो तो पूर्व आदि दिशा को मुख वाले घर में प्रवेश करना चाहिये। ऐसा करने से सूर्य्य पूर्व आदि दिशाओं में यथाक्रम वांया हो जाता है ॥६॥

गृहप्रवेशे कुम्भचक्रम्.

रविभाद्दिननक्षत्रपर्यन्तं गणना—

मुखे	१	अग्निदाहः
पूर्वे	४	वासशून्यम्
दक्षिणे	४	लाभः
पश्चिमे	४	लक्ष्मीः
उत्तरे	४	कलहः
गर्भे	४	नाशः
गुदे	३	स्थिरता
कण्ठे	३	स्थिरता
	२७	

(अर्थ)

सूर्य नक्षत्र से दिन नक्षत्र पर्यन्त गिनती करनी चाहिये। फल ऊपर लिखा है ॥

देवप्रतिष्ठादि मुहूर्तः

जलाशयारामसुरप्रतिष्ठा
सौम्यायने जीवशशाङ्कशुक्रे।
दृश्ये मृदुक्षिप्रचरध्रुवे स्यात्
पक्षे सिते स्वर्क्षतिथिक्षणेवा ॥
(यथा विष्णोः श्रवणभम्। शिवस्यार्द्रेत्यादयः) ॥१॥
रिक्तारवर्जे दिवसेऽतिशस्ता
शशाङ्कपापैस्त्रिभवाङ्गसंस्थैः।
व्यन्त्याष्टगैः सत्खचरैः ॥२॥

(अर्थ)

जलाशय, वगीचा, अथवा मन्दिर की प्रतिष्ठा उत्तरायण में, जब बृहस्पति, चन्द्रमा, शुक्र उदय हों अर्थात् अस्त न हों, मृदु, क्षिप्र, चर, ध्रुव नक्षत्रों में, शुक्ल पक्ष में, अपने नक्षत्र अपनी तिथि तथा अपने मुहूर्त में करने चाहिये (अपने नक्षत्र आदि से यह अभिप्राय है कि जैसे श्रवण नक्षत्र का स्वामी विष्णु है, आर्द्रा नक्षत्र का स्वामी शिव है, इसलिये विष्णु के मन्दिर की प्रतिष्ठा श्रवण नक्षत्र में, शिव के मन्दिर की प्रतिष्ठा आर्द्रा नक्षत्र में करनी चाहिये इत्यादि) ॥१॥

रिक्ता तिथि तथा मंगल वार को छोड़ कर, जब चन्द्रमा तथा पाप ग्रह ३,११,६ स्थानों में हों तथा शुभ ग्रह १२,८ स्थानों में न हों, ऐसे मुहूर्त में प्रतिष्ठा शुभ है ॥२॥

(३) यात्रा प्रकरणम्

सम्मुखचन्द्रादयः

कर्क वृश्चि. मी.
(उ)

मि. तु. कुं. (प) —————— (पू) मे. सिं. ध.

(द) वृष. कन्या. म.

मेषेचसिंहे धनुषीन्द्रभागे
तथोक्षकन्यामकरेषुयाम्याम् ।
द्वन्द्वे तुलायां घटभेप्रतीच्यां
तथोत्तरे कर्कझषालिगोऽब्जः ॥

यथा मेषे चन्द्रः । तर्हि पूर्वयात्रायां सम्मुखः
पश्चिम यात्रायां पृष्ठः
उत्तर यात्रायां दक्षिणः
दक्षिण यात्रायां वामः

पृष्ठे चन्द्रे भवेन्मृत्यु र्वामे चन्द्रे धनक्षयः
दक्षिणे चार्थलाभः स्यात्सम्मुखे सुखसम्पदः ॥

(अर्थ)

जब मेष, सिंह, धन का चन्द्रमा हो तो पूर्व दिशा को चन्द्रमा सम्मुख होता है, जब वृष, कन्या, मकर का चन्द्रमा हो तो दक्षिण दिशा को सम्मुख होता है, जब मिथुन, तुला, कुम्भ का चन्द्रमा हो तो पश्चिम को सम्मुख होता है, कर्क, वृश्चिक, मीन का चन्द्रमा हो तो उत्तर को सम्मुख होता है ॥

इसका अभिप्राय यह है । मानलो कि आज के दिन चन्द्रमा मेष राशि में है यदि पूर्व दिशा को यात्रा की जाय तो सम्मुख चन्द्रमा होगा, यदि आज के दिन पश्चिम दिशा को यात्रा की जाय तो पृष्ठ चन्द्रमा हो जायगा, यदि उत्तर दिशा को यात्रा की जाय तो दक्षिण चन्द्रमा होगा, यदि दक्षिण दिशा को यात्रा की जाय तो वाम चन्द्रमा होगा । इसी प्रकार से अन्यत्र समझना चाहिये ॥

फल

पृष्ठ चन्द्रमा में यात्रा करने का फल मृत्यु है । वाम चन्द्रमा का फल धन का नाश है । दक्षिण चन्द्रमा का फल धन लाभ है । सम्मुख चन्द्रमा का फल सुख तथा सम्पत्ति है ॥

(सम्मुख तथा दक्षिण चन्द्रमा शुभ हैं, पृष्ठ तथा वामे चन्द्रमा अशुभ हैं। अत्यन्त आवश्यकता में वाम चन्द्रमा स्वीकार हो सकता है परन्तु पृष्ठ चन्द्रमा कदापि नहीं।)

वारदोषाः (दिशाशूल वा)

चन्द्रे मन्दे नच प्राचीं न गच्छेद् दक्षिणां गुरौ।
न प्रतीचीं रवौ शुक्रे बुधे भौमे नचोत्तराम् ॥१॥
नाग्निकोणे गुरौचन्द्रे नैर्ऋत्ये नार्कशुक्रयोः।
मारुते न कुजे गच्छे दीशाने न कुजार्कजे ॥२॥
नवारदोषाः प्रभवन्तिरात्रौ
देवेज्यदैत्यज्यदिवाकराणाम्।
दिवाशशाङ्कार्कजभूसुतानां
सर्वत्र निन्द्यो बुधवारदोषः ॥३॥

(अर्थ)

चन्द्र तथा शनिवार को पूर्व दिशा की यात्रा न करे, बृहस्पति वार को दक्षिण दिशा की यात्रा न करे, रविवार तथा शुक्रवार को पश्चिम की यात्रा न करे, बुध तथा मंगलवार को उत्तर की यात्रा न करे। (इसी को वारदोष अथवा दिशाशूल कहते हैं) ॥१॥

बृहस्पति तथा चन्द्र वार को आग्नेय कोण की यात्रा न करे, रवि तथा शुक्रवार को नैऋंत्य कोण की यात्रा न करे, मंगल वार को वायव्य की यात्रा न करे, मंगल तथा शनि वार को ईशान की यात्रा न करे ॥२॥

बृहस्पति, शुक्र तथा सूर्य्य का वारदोष रात्रि की यात्रा में नहीं होता है, चन्द्रमा शनि तथा मगल का वारदोष दिन में नहीं होता है, परन्तु बुधवार का दोष रात दिन में उभयत्र वर्जित है। (यह वचन आवश्यक में परिहार है। जहां तक सम्भव हो वारदोष रात दिन में उभयत्र वर्जित करना चाहिये) ॥३॥

योगिनी.

पूउआनैदपावाई दिक्षु प्रतिपदादितः।
योगिनी सम्मुखेत्याज्या द्यूते वादे रणे गमे ॥१॥
योगिनी सुखदा वामे पृष्ठे वाञ्छितदायिनी।
दक्षिणे धनहन्त्री च सम्मुखे मरणप्रदा ॥२॥

(अर्थ)

प्रतिपदा आदि तिथियों में पूर्व, उत्तर, आग्नेय, नैऋत्य, दक्षिण, पश्चिम, वायव्य, ईशान में यथाक्रम योगिनी होती है। (यह बात चक्र से स्पष्ट समझने में आजवेगी)। जुआ खेलने में, वहिस में, संग्राम में, यात्रा में सम्मुख योगिनी वर्जित है ॥१॥

योगिनी वाम में हो तो सुख मिलता है, पृष्ठ में हो तो अभीष्ट कार्य सिद्ध होते हैं, दक्षिण में हो तो धन का नाश होता है, सम्मुख हो तो मृत्यु होती है ॥२॥

काल पाशः (काल राहुः)

कौवेरीतो वैपरीत्येन कालो वारेऽर्काद्ये सम्मुखे तस्य पाशः।
रात्रावेतौ वैपरीत्येन गण्यौ यात्रायुद्धे सम्मुखे वर्जनीयौ ॥१॥
दक्षिणस्थः शुभ. कालः पाशो वामदिशि स्थितः ॥२॥
(कालात्पंचमे पाशः। रात्रौ पाशस्थाने कालः कालस्थानेपाशः)

(अर्थ)

सूर्य्य आदि वारों को उत्तर आदि दिशाओं में बांई ओर गिनने से क्रमशः काल जानना चाहिये। उसी काल के सामने अर्थात् उससे पांचवां पाश होता है। रात्रि में इनको विपरीत गिनना चाहिये अर्थात् काल के स्थान में पाश तथा पाश के स्थान में काल। यात्रा तथा युद्ध में सम्मुख का काल अथवा पाश वर्जित करना चाहिये। काल दक्षिण की ओर शुभ होता है तथा पाश बांई ओर शुभ होता है ॥

लालाटिक योगः

प्राच्यां लग्नगतो ललाटग इनश्चन्द्रोऽरिपुत्रोपगो
वायव्यां यमदिश्यस्रग्दशमगो ज्ञोऽप्युत्तरस्यां सुखे।
ऐशान्यां त्रिघने गुरुर्दहनदिश्यायव्ययस्थो भृगु
र्वारुण्यां मदगोऽर्कजोऽष्टनवगो राहुस्त्यजेन्नैर्ऋतिम् ॥१॥
लालाटेऽग्निभयं करोति दिनकृत्कोशक्षयं लोहितः
सापत्नैर्विजयं शशाङ्कतनयः सेनाविमर्दं गुरुः।
मृत्युं भास्करनन्दनो नरपते व्याधिं तथा विप्ररा
डेतान्येव समस्तखेचरफलान्येकः सितो यच्छति ॥२॥
दिगीश्वरो ललाटस्थो यदि वा दिग्बलान्वितः।
वधबन्धप्रदो यातुः केन्द्रगस्तु जयार्थदः ॥३॥
दिगीशाः सूर्य शुक्रार राहुर्केन्दुज्ञसूरयः।
दिगीश्वरे ललाटस्थे यातुर्न पुनरागमः ॥४॥

(अर्थ)

लग्न का सूर्य्य पूर्व दिशा में, ५,६ स्थानों का चन्द्रमा वायव्य में, दशम स्थान का मंगल दक्षिण में, सुख स्थान का बुध उत्तर में, २,३ स्थानों का बृहस्पति ईशान में, ११,१२, स्थानों का शुक्र आग्नेय में,

सप्तम स्थान का शनि पश्चिम में, ८,९ स्थानों का राहु नैऋ त्य में, ललाट गत जानना चाहिये तथा वर्जित करना चाहिये ॥१॥

यदि सूर्य ललाट में हो तो अग्नि भय होता है, मंगल हो तो खजाने का नाश करता है, यदि बुध हो तो शत्रुओं से पराजय कराता है, यदि बृहस्पति हो तो सेवा का नाश करता है, यदि शनि हो तो मृत्यु करता है, यदि चन्द्रमा हो तो व्याधि करता है, यदि शुक्र हो तो पूर्वोक्त सब फलों को केवल वही देता है ॥२॥

दिशा का स्वामी ललाट में हो अथवा दिग्बल से युक्त हो (पृ०११३) तो यात्रा करने वाले का वध तथा बन्धन कराता है, यदि केन्द्र में हो तो जय तथा धन को देता है ॥३॥

सूर्य, शुक्र, मंगल, राहु, शनि, चन्द्रमा, बुध तथा बृहस्पति क्रम से पूर्व आदि दिशाओं के स्वामी हैं।

यदि यात्रा के समय दिशा का स्वामी ललाट में हो तो यात्रा करने वाला मनुष्य फिर लौट कर नहीं आता है ॥४॥

परिघदण्डः

भानि स्थाप्यान्यब्धिदिक्षु सप्त सप्तानलर्क्षतः ।
वायव्याग्नेयदिक्संस्थं पारिघं न विलङ्घयेत् ॥१॥
अग्नेर्दिशंनृपइयात्पुरुहूतदिग्भै रेवं प्रदक्षिणगताविदिशोथकृत्ये।
आवश्यकेपिपरिघंप्रविलङ्घ्यगच्छेच्छूलंविहाययदिदिक्तनुशुद्धिरस्ति

(अर्थ)

कृतिका नक्षत्र से ७,७ नक्षत्र क्रम से ४ दिशाओं में स्थापन करने चाहिये। वायव्य तथा आग्नेय कोण में परिघ दण्ड होता है, उसका उल्लङ्घन नहीं करना चाहिये।

पूर्व दिशा में कहे हुए नक्षत्रों में आग्नेय में यात्रा करे। इसी प्रकार विदिशा अपने दक्षिण में शामिल हैं। आवश्यक में परिघ दण्ड का उल्लङ्घन करे यदि दिशा शूल का दोष न हो, दिशा तथा लग्न की शुद्धि हो

(पूर्व में आग्नेय शामिल है, दक्षिण में नैर्ऋत्य शामिल है, पश्चिम में वायव्य शामिल है, उत्तर में ईशान शामिल है ॥)

घात नक्षत्राणि.

मघाकरस्वातिमैत्र मूलश्रुत्यम्बुपान्त्यभम् ।
याम्यब्राह्मेशसार्पं च मेषादेर्घातभं न सत् ॥

(अर्थ)

मेष राशि (वाले मनुष्य) को मघा, वृषको हस्त, मिथुन को स्वाती, कर्क को अनुराधा, सिंह को मूल, कन्या को श्रवण, तुला को उत्तराषाढ़ा, वृश्चिक को रेवती, धन को भरणी, मकर को रोहिणी, कुम्भ को आर्द्रा, मीन को अश्लेषा नक्षत्र, घात नक्षत्र हैं । ये शुभ नहीं हैं ॥

घात लग्नानि.

भूमिद्वयब्ध्यद्रिदिक्सूर्याङ्काष्टाङ्केशाग्निसायकाः ।
मेषादिघातलग्नानि यात्रायां वर्जयेत्सुधीः ॥

(अर्थ)

मेष राशि को मेष लग्न, वृष राशि को वृष लग्न, मिथुन राशि को कर्क लग्न, कर्क राशि को तुला, सिंह राशि को मकर, कन्या राशि को मीन, तुला को धन, वृश्चिक को वृश्चिक, धन को धन, मकर को कुम्भ, कुम्भ को मिथुन, मीन राशि को सिंह घात लग्न हैं । इनको यात्रा में वर्जित करना चाहिये ॥

घातवारा

नक्रे भौमो गोहरिस्त्रीषु मन्दश्चन्द्रो द्वन्द्वेऽर्कोऽजभेज्ञश्चकर्के ।
शुक्रः कोदण्डालिमीनेषु कुम्भे जूके जीवो घातवारा नशस्ताः ॥

(अर्थ)

मकर राशि वाले मनुष्य को मंगलवार, वृष, सिंह, कन्या राशि को शनि, कन्या राशि को चन्द्र, मेष को सूर्य्य, कर्क को बुध, धन, वृश्चिक तथा मीन को शुक्र, कुम्भ तथा तुला को बृहस्पति घात वार हैं । यात्रा में ये शुभनहीं हैं ॥

घाततिथयः

गोस्त्रीझषे घाततिथिस्तु पूर्णा भद्रा नृयुक्कर्कटकेऽथनन्दा ।
कौर्प्याजयोर्नक्रघटे च रिक्ता जयाधनुःकुम्भहरौ न शस्ताः ॥

(अर्थ)

वृष, कन्या, तथा मीन राशियों में पूर्णा तिथि, मिथुन, तथा कर्क में नन्दा तिथि, तुला, मेष, मकर, तथा कुम्भ में रिक्ता तिथि, धन, कुम्भ, तथा सिंह में जया तिथि, घात तिथि कहलाती हैं। ये यात्रा में शुभ नहीं हैं ॥

घातचन्द्रः

भूपञ्चाङ्कद्वयङ्गदिग्वह्निसप्त वेदाष्टेशार्काश्च घाताख्यचन्द्रः ।
मेषादीनां राजसेवाविवादे यात्रायुद्धाद्ये च नान्यत्र वर्ज्यः ॥१॥

अजाज्जन्मधीधर्मवित्तारिखत्रि
स्मरास्त्वष्टलाभान्त्यगो घातचन्द्रः ।
नृपद्वारयात्राचरोधागमादौ
विचिन्त्यो विवाहादिके नैव चिन्त्यः ।
तीर्थयात्रा विवाहान्न प्राशनोपनयनादिषु ।
माङ्गल्यसर्वकार्येषु घातचन्द्रं न चिन्तयेत् ॥

मे.	वृ.	मि.	कर्क.	सिं.	कन्या	तु.	वृ.	ध.	म	कुं.	मी
१	५	९	२	६	१०	३	७	४	८	११	१२
